नं. ११-५-मा [illegible]
१९८ पत्राणि
[illegible] २६३२

॥ अद्यपुस्तकं वैद्यनाथपाठकीयं
श्री ताकराम लछमण पाठकस्येदं

श्रीगणेशाय नमः॥ धातोः।-आतृतीयसमाप्तेरधिकारोऽयं। तत्रोपपदं स
प्तमीस्थम्। कृदतिङ्॥ वाऽसरूपोऽस्त्रियाम्॥ परिभाषेयं।-अस्मिन्धात्वधिका
रेऽसरूपोऽपवादप्रत्ययउत्सर्गस्य बाधको वा स्यात् स्त्र्यधिकारोक्तं विना। कृत्याः।
-अधिकारोऽयं ण्वुलः प्राक्॥ कर्त्तरि कृत्॥ कृत्प्रत्ययः कर्त्तरि स्यादिति प्राप्ते तयोरेव
कृत्यक्तखलर्थाः। एते भावकर्मणोरेव स्युः॥ तव्यत्तव्यानीयरः॥ धातोरेते प्रत्ययाः स्युः॥
तकाररेफौ स्वरार्थौ। एधितव्यम्॥ एधनीयं। त्वया। भावे असर्गिकमेकवचनं क्ली
बत्वं वा। चेतव्यश्चयनीयो वा धर्मस्त्वया। वसेस्तव्यत् कर्त्तरि णिच्च॥ वसतीति वास्तव्यः।

केजि मर रूपसंख्यानम्॥ पवेजि माभाषाः॥ पक्तव्याः॥ भिदेजि माः खरजाः॥ भेत्तव्याः॥ क
र्मणि प्रत्ययः॥ वृत्तिकारस्तु कर्मकर्त्तरि दिवाय मिष्यतइत्याहतद्भाष्यविरुद्धं॥ कृत्यचः॥
उपसर्गस्थान्निमित्तात्परस्याच उत्तरस्य कृत्स्थस्य नस्य णत्वं स्यात्॥ प्रयाणीयं॥ अचः
किं॥ प्रमग्नः॥ निर्विण्णस्योपसंख्यानं॥ अचः परत्वाभावान्नकारव्यवधानाच्चाप्राप्ते वच
नं॥ परस्य णत्वं॥ पूर्वस्य तु त्वं निर्विण्णः॥ णेर्विभाषा॥ उपसर्गस्थान्निमित्तात्परस्य ण्यन्ताद्विहि
तो यः कृत्तत्स्थस्य नस्य णो वा स्यात्॥ प्रयापणीयं॥ प्रयापनीयं॥ विहितविशेषणं किं॥ यका
व्यवधाने यथा स्यात्॥ प्रयाम्यमाणं पश्य॥ णत्वे दुर उपसर्गत्वं नेष्यते॥ दुर्यानं॥ दुर्यापनं॥

सि० कौ० उ० कृ०

१११

हलश्चेजुपधात्॥ हलादेरिजुपधात्कृन्नस्याचः परस्य णो वा स्यात्। प्रकोपणीयं। प्रको
पनीयं। हलः किं। ओहणीयं। इजुपधात्किं। प्रवपणीयं॥ इजादेः सनुमः॥ सनुमश्चेद्भवति इ
जादेर्हलन्ताद्विहितो यः कृत्तत्स्थस्यैव। प्रेंखणीयं। इजादेः किं। मगि सर्पणे। प्रमंगनीयं। नु
म्ग्रहणमनुस्वारोपलक्षणं। अकुप्वाङिति सूत्रेप्येवं। तेनेह न। प्रेन्वनं। इह तु स्यादेव। प्रोंभ
णं॥ वा निंसनिक्षनिंदां॥ एषां नस्य णो वा स्यात्कृति परे। प्रणिंसितव्यं। प्रनिंसितव्यं॥ न भाभू
पूकमिगमिप्यायीवेपां॥ एभ्यः कृन्नस्य णो न। प्रभानीयं। प्रभवनीयं। पूञ एवेह ग्रहणमि
ष्यते। पूङः स्तु। प्रपवणीयः सोमः। ण्यन्तभादीनामुपसंख्यानं। प्रभापनीयं। व[illegible] राम २

स्ययोवेस्तुत्कं णत्वप्रकरणे परितश्चोध्यं। यत्वस्यासिद्धत्वेन शकारव्यवधानान्न णत्वं।
प्रख्यानीयं। कल्यस्फुटोवकुलं। स्नांत्यनेन स्नानीयं चूर्णं। दीयतेऽस्मै दानीयो विप्रः। अचोय
त्। अजंताद्धातोर्यः स्यात्। चेयं। जेयं। अज्ग्रहणं शकयमकर्तुं। योगविभागोप्येवं। तव्यदादि
ष्वेव यतोपि स्तुपठत्वात्। ईद्यति। यति परे आत ईः स्यात्। गुणः। देयं। ग्लेयं। तकिशसिचतियति
जनिभ्यो यद्वाच्यः। तक्यं। शस्यम्। चत्यं। यत्यम्। जन्यम्। जनेर्यद्विधिः स्वरार्थः। एयता पि रू
पसिद्धेः। नवृद्धिप्रसंगः। जनिवध्योश्चेति निषेधात्। हनो वा यद्वधश्च वक्तव्यः। वध्यः। पक्षेव
क्ष्यमाणेण्यत्। घात्यः। पोरदुपधात्। पवर्गांताददुपधाद्यः स्यात्। एयतोऽपवादः। शप्यं।

लभ्यम्‌। नानुबंधकृतमसारूप्यं। अतो न ण्यत्। तव्यदादयस्तु स्युरेव। आङो यि। आङः
परस्य लभेर्नुम् स्याद्यादौ प्रत्यये विवक्षिते। नुमि कृते ऽदुपधत्वाभावाण्ण्यदेव। आलंभ्यो
गौः। उपात्प्रशंसायाम्‌। उपलंभ्यः साधुः। स्तुतौ किं। उपलभ्यं शाकं उपलभ्यः। शकिस
होश्च। शक्यं सह्यं। गदमदचरयमश्चानुपसर्गे। गद्यं मद्यं। चर्य्यम्‌। चरेराङि चागुरौ। आ
चर्यो देशः। गंतव्य इत्यर्थः। अगुरौ किं। आचार्यो गुरुः। यमेर्नियमार्थम्‌। सोपसर्गान्मा
भूदिति। प्रयाम्यम्‌। निपूर्वात्स्यादेव। तेन न तत्र भवेद्धि नियम्यमिति वार्त्तिकप्रयोगा
त्। एतेनानियम्यस्य नायुक्तिः। त्वया नियम्या ननु दिव्यचक्षुषेत्यादि व्याख्यातम्‌। निय

मे साधुरिति वा॥ अवद्यपण्यवर्या गर्ह्यपणितव्यानिरोधेषु॥ वदेर्नञि उपपदे वदः

सुपीति यत्क्यपोः प्राप्तयोर्यदेव सोपि गर्ह्यायामेवेत्युभयार्थं निपातनं॥ अवद्यं पापं गर्ह्यं

किम्॥ अनुद्यं गुरुनाम। तद्धि न गर्ह्यं वचनानर्हं त्वा॥ आत्मनाम गुरोर्नाम नामातिकृपणस्य

च। श्रेयस्कामो न गृह्णीयाज्ज्येष्ठापत्यकलत्रयोरिति स्मृतेः। पण्या गौः॥ व्यवहर्त्तव्येत्यर्थः॥ पाण्य

मन्यत्। स्तुत्यर्हमित्यर्थः॥ अनिरोधोऽप्रतिबन्धः तस्मिन्विषये वृङो यत्। शतेन वर्या कन्या।

वृत्यान्या॥ वह्यं करणं॥ वहन्त्यनेनेति वह्यं शकटं॥ करणं किं। बालं वोढव्यं॥ अर्यः स्वामिवैश्ययोः॥

ऋगतौ॥ अस्माद्यत्॥ ण्यतोऽपवादः॥ अर्यः स्वामी वैश्यो वा॥ अनयोः किं॥ आर्यो ब्राह्मणः॥ प्राप्तव्य

सि॰कौ॰उ॰कृ॰

११९

इत्यर्थः। उपसर्या काल्या प्रजने। गर्भग्रहणे प्राप्तकाला चेदित्यर्थः। उपसर्या गौः। गर्भाधानार्थं वृ
षभेण उपगन्तुं योग्येत्यर्थः। प्रजने काल्येति किं। उपसार्या काशी। प्राप्तव्येत्यर्थः। अजर्यं संगतं।
नञ्पूर्वाज्जीर्यतेः कर्तरि यत् संगतं चेद्विशेष्यं। न जीर्यतीत्यजर्यं। तेन संगतमार्येण रामाजर्यं कु
रु द्रुतमिति भट्टिः। मृगैरजर्यं जरसोपदिष्टमदेहबन्धाय पुनर्बबन्ध इत्यत्र संगतमिति विशेष्यम
ध्याहार्यं। संगतं किं। अजरिता कंबलः। भावे तु संगतकर्तृकेपि ण्यदेव। अजार्यं संगतेन। वदः सु
पि क्यप् च। उत्तरसूत्रादिह भाव इत्याकृष्यते। वदेर्भावे क्यप् स्याच्चाद्यत्। अनुपसर्गे सुप्युपपदे। ब्र
ह्मोद्यं। ब्रह्मवद्यं। ब्रह्मवेदः तस्य वदनमित्यर्थः। कर्मणि प्रत्ययाविमौ केचित्। उपसर्गे तु ण्यदेव। अनु

राम

४

तृ।१

वाद्यं। अपवाद्यं। भुवो भावे। क्यप् स्यात्। ब्रह्मणो भावो ब्रह्मभूयं। सुपीत्येव। भव्यं। अनुपसर्ग इ-
त्येव। प्रभव्यं। हनस्त च। अनुपसर्गे सुप्युपपदे हन्तेर्भावे क्यप् स्यात्तकारश्चान्तादेशः। ब्रह्मणो
हननं ब्रह्महत्या। स्त्रीत्वं लोकात्। एति स्तु शास् वृ दृ जुषः क्यप्। एभ्यः क्यप् स्यात्। ह्रस्वस्य पिति कृ- स्य रु
ति तुक्। इत्यः स्तुत्यः। शास इदङ्हलोः। शिष्यः। वृ इति वृञो ग्रहणं न वृङः। वृत्यः। वृङस्तु वा-
र्याः ऋत्विजः। आदृत्यः। जुष्यः। पुनः क्यब्वृत्तिः परस्यापि ण्यतो बाधनार्था। अवश्यस्तुत्यः। शं-
सि दुहि गुहिभ्यो वेति काशिका। शस्यं शंस्यं दुह्यं दोह्यं गुह्यं गोह्यं। प्रशस्यस्य श्रः। ईडवंदवृशं-
सदुहां ण्यत इति सूत्रे उदयवजाछंसेः सिद्धम्। इतरयोस्तु मृजं मृज्यम्। आङ्पूर्वादंजेः सं-

ज्ञायामुपसंख्यानं। अंजू व्यक्तिम्रक्षणादिषु। बाहुलकात्करणे क्यप्। अनिदितामिति नलो
पः। आज्यं। ऋदुपधाच्चाक्लृपिचृतेः। वृत्यं। वृधु। वृध्यम्। अक्लृपिचृत्योस्तु। कल्प्यम्। चर्त्यं। त
परकरणं किं। कृत्यं। कीर्त्यं। अनित्यण्यंताश्चुरादयः इति णिजभावे ण्यत्। णिजंतात्तु यदेव। ई
च खनः। चात्क्यप्। आ इ च। खेयं। ईचेति ह्रस्वः सुपठः। भृञोऽसंज्ञायां। भृत्याः कर्मकराः। भर्तव्या
इत्यर्थः। क्रियाशब्दोऽयं न तु संज्ञा। समश्च बहुलं। संभृत्याः। संभार्याः। असंज्ञायामेव विक
ल्पार्थमिदं वार्त्तिकम्। असंज्ञायां किं। भार्या नाम क्षत्रियाः। अपकपं भार्या वधूरिति। इह हि
संज्ञायां समजेति क्यपाभाव्यं। संज्ञापर्युदासस्तु पुंसि चरितार्थः। सत्यं विभर्तेः भृ इति दी

र्घीता ऋचा देवीण्यत्। क्यप् तु भरते देवा तदनुबंध्य ग्रहणे इति परिभाषया। मृजेर्विभाषा। मृजेः
क्यप् वा स्यात् पक्षे ण्यत्। मृज्यः। चजोः कुघिण्यतोः। चस्य जस्य च कुत्वं स्यात् घिति ण्यति च परे। मृजे
र्वृद्धिः। मार्ग्यः। न्यंक्वादीनां च। कुत्वं स्यात्। न्यंकुः। नाचं चेकः। राजसूय सूर्य मृषोद्य रुच्य कुप्य
कृष्टपच्याव्यथ्याः। एते सप्त क्यबंता निपात्यंते। राज्ञा सोतव्यो ऽभिषवद्वारा निष्पादयितव्यः।
यद्वा लतात्मकः सोमो राजा स सूयते कंड्यते वेति-अधिकरणे क्यप् निपातनाद्दीर्घः। राज
सूयः। राजसूयं॥-अर्द्धर्चादिः। सरत्याकाशे सूर्यः। कर्तरि क्यप्। निपातनादुत्वं। यद्वा षू प्रेर
णे तुदादिः। सुवति कर्मणि लोकं प्रेरयति क्यप् रुट्। मृषोपपदाद्वदेः कर्मणि नित्यं क्यप्। मृ

षोद्यं। विशिष्टेष्यनिघ्नोऽ योऽत्र ध्रु यसौ दर्य गुणान् मृषोद्याः। रोचते रुच्यः। गुपेरादेः कत्वं च सं
ज्ञायां। सुवर्णरजतभिन्नं धनं कुप्यं। कृष्टे स्वयमेव पच्यंते कृष्टपच्याः। कर्मकर्त्तरि। शुद्धे तु क
र्मणि कृष्टपाक्याः। न व्यथतेऽव्यथ्यः। भिद्योद्ध्यौ नदे। भिदेरुज्झेश्च क्यप्। उज्झेर्द्धत्वं च। भिन
त्ति कूलं भिद्यः। उज्झत्युदकमुद्ध्यः। नदे किं। भेत्ता। उज्झिता। पुष्यसिद्ध्यौ नक्षत्रे। अधिकरणे
क्यब्निपात्यते। पुष्यंत्यस्मिन्नर्थाः पुष्यः। सिद्ध्यंत्यस्मिन्सिद्ध्यः। विपूयविनीयजित्या मुंजक
हलिषु। पूञ्नीञ्जिभ्यः क्यप्। विपूयो मुंजः। रज्ज्वादिकरणाय शोधयितव्य इत्यर्थः। विनीयः
कल्कः। पिष्ट औषधविशेष इत्यर्थः। पापमिति वा। जित्यो हलिः। बलेन कृष्टव्य इत्यर्थः। कृष्ट

समीकरणार्थं स्थूलकाष्ठं।अन्यत्तु विपक्ष्यं। विनेयम्। जेयम्। प्रत्यपिभ्याङ्ग्रहेः। छंदसीतिव
क्तव्यं। प्रतिगृह्यं।अपिगृह्यं। लोके तु प्रतिग्राह्यं।अपिग्राह्यं। पदास्वैरिबाह्यापक्ष्येषु च।अव
गृह्यम्प्रगृह्यम्पदं।अस्वैरीपरतंत्रः। गृह्यकाः शुकाः। पंजरादिबंधेन परतंत्रीकृता इत्य
र्थः। बाह्यायां ग्रामगृह्या सेना। ग्रामबहिर्भूतेत्यर्थः। स्त्रीनिर्देशात्पुन्नपुंसकयोर्न। पक्षे भ
वः पक्ष्यः। दिगादित्वाद्यत्।आर्यैर्गृह्यते आर्यगृह्यः। तत्पक्षाश्रित इत्यर्थः। विभाषा कृवृषोः। क्य
प्स्यात्। कृत्यं। वृष्यं। पक्षे। ऋहलोर्ण्यत्। ऋवर्णान्ताद्धलन्ताच्च धातोर्ण्यत्स्यात्। कार्यम्। वर्ष्यं। यु
ग्यं च पत्रे। पत्रं वाहनं। युग्यो गौः।अत्र क्यप्कुत्वं च निपात्यते।अमावस्यदन्यतरस्यां।अमोपपदा

द्व सेरध्यिकरणे ण्यत् । वृद्धौ सत्यामपि हस्वश्च निपात्यते । अमावसह्व सतोः स्याम्वंद्राकौ
अमावस्याऽमावास्या । सहे जोर्ण्यत् । वञ्चोऽतिकुत्वं । पाक्यं । पाणौ सृजेर्ण्यद्वाच्यः । ऋदुपधल
क्षणस्य क्यपोऽपवादः । पाणिभ्यां सृज्यते पाणिसर्ग्या रज्जुः । समवपूर्वाच्च ॥ समवसर्ग्या । न कादेः ।
कादेर्धातो श्चजोः कुत्वं न । गर्ज्यम् । वार्त्तिककारस्तु । वञ्चोऽदितिसूत्रे निष्ठायामनिट इति सूत्रयि
त्वा नकादेरित्यादि प्रत्याचख्यौ । तेनार्जितर्जिप्रभृतीनां न कुत्वं निष्ठायां सेट्त्वात् । शुचुकु
चुप्रभृतीनां तु कादित्वेऽपि कुत्वं स्यादेव । सूत्रमते तु यद्यपि विपरीतं प्राप्तं तथापि यथोत्तरं मु
नीनां प्रामाण्यं । अजिव्रज्योश्च । न कुत्वं । समाजः । परिव्राजः । भुजन्युब्जौ पाण्युपतापयोः । एत

घ्योरेतौ निपातौ। भुज्यते ऽनेनेति भुजः पाणिः। हलश्चेति घञ्। न्युब्जंत्यस्मिन्निति न्युब्जः। उपतापो
रोगः। पाण्युपतापयोः किं। भोगः। समुद्गः। प्रयाजानुयाजौ यज्ञांगे। पंच प्रयाजाः। त्रयो ऽनुयाजाः। य
ज्ञांगे किं। प्रयागः। अनुयागः। वंचे र्गतौ। कुत्वं न। वंच्यम्। गतौ किं। वंक्यं काष्ठम्। कुटिलीकृतमि
त्यर्थः। ओक उचः के। उचे र्गुणः कुत्वं निपात्यते के परे। ओकः शकुन्तवृषलौ। इगुपधलक्षणः कः। घ
ञास्ति कुत्व ऽन्तोदात्तार्थमिदं। ण्य आवश्यके। कुत्वं न। अवश्यपाच्यं। यजयाचरुचप्रवचर्चश्च। ण्ये कु
त्वं न। याज्यं। याच्यं। रोच्यं। प्रवाच्यं। ग्रन्थविशेषः। सत्रु। अर्च्यं। ऋदुपधत्वेपि अत एव ज्ञापकाण्ण्य
त्। त्यजेश्च। त्याज्यं। त्यजिपूज्योश्चेति काशिका। तत्र पूजेर्ग्रहणं चिंत्यं भाष्यानुक्तत्वात्। एतत्प्रकरणे

त्यजे रूपसंख्यानमिति हि भाष्यं। वचोऽशब्दसंज्ञायां। वाच्यं। शब्दसंज्ञायां तु वाक्यं। प्रयोज्यनियो
ज्यौ शक्यार्थे। प्रयोक्तुं शक्यः प्रयोज्यः। नियोज्यो भृत्यः। भोज्यं भक्ष्ये। भोग्यमन्यत्। एतत्प्रकरणे
ऽपि दभिभ्यां वेति वक्तव्यं। लाप्यं। दभिर्धातुरपठितोपि वार्त्तिकबलात्स्वीकार्यः। दभ्यः। ओरा
वश्यके। उवर्णान्ताण्ण्यत्स्यादावश्यकं भावे द्योत्ये। लाव्यं। पाव्यं। आसुयुवपिरपित्रपिचम
श्च। षुञ्। आसाव्यं। युमिश्रणे। याव्यम्। वाप्यं। राप्यं। त्राप्यं। चाम्यं। आनाय्योऽनित्ये। आङ्पूर्वान्न
यतेर्ण्यदायादेशश्च निपात्यते। दक्षिणाग्निविशेषणं चेदं। स हि गार्हपत्यादानीयतेऽनित्यश्च सत
तमप्रज्वलनात्। आनेयोऽन्यः। घटादिः। वैश्यकुलादेरानीतो दक्षिणाग्निश्च। प्रणाय्योऽसंमतौ।

सम्मतिः प्रीतिविषयी भवनं कर्मण्या पारः। तथा भोगेष्वादरोपि संमतिः। प्रणाय्य श्चोरः। प्रीत्यन
र्ह इत्यर्थः। प्रणाय्योऽन्तेवासी। विरक्त इत्यर्थः। प्रणेयोऽन्यः। पाय्य सान्नाय्य निकाय्य धाय्यामान
हविर्निवाससामिधेनीषु। मीयतेऽनेन पाय्यं मानं। एषत्वा ध्यात्वादेः पत्वं वा-आतो युगिति युक्। स
म्यङ् नीयते होमार्थमग्निं प्रतीति सान्नाय्यं हविर्विशेषः। एषदाप्यादेशः समो दीर्घश्च निपात्यते। निवी
यतेस्मिन्धान्यादिकं निकाय्यो निवासः। अधिकरणे एषत्वा आयु ध्यात्वादेः कत्वं च निपात्यते। धीय
तेऽनया समिदिति धाय्या समृक्। क्रतौ कुण्डपाय्य संचाय्यौ। कुण्डेन पीयतेस्मिन्सोमः कुंडपाय्यः
क्रतुः। संचीयतेऽसौ संचाय्यः। अग्नौ परिचाय्योपचाय्यसमूह्याः। अग्निधारणार्थे स्थलविशेषेए

तेसाधवः। अन्यत्र तु परिचेयं उपचेयं संचाय्यं। चित्याग्निश्चित्ये वा चीयते ऽसौ चित्यो ऽग्निः। अग्नेश्चयन
मग्निचित्या। प्रैषातिसर्गप्राप्तकालेषु कृत्याश्च। त्वया गंतव्यं। गमनीयं। गम्यं। इह लोटा बाधा मा भू
दिति पुनः कृत्यविधिः। स्त्र्यधिकारादूर्ध्वं वासरूपविधिः क्वचिन्नेति ज्ञापयति। तेन क्तल्युट्तुमुन्ख
लर्थेषु नेति सिद्धं। अर्हे कृत्यतृचश्च। स्तोतुमर्हः स्तुत्यः। स्तुतिकर्म। स्तोता। स्तुतिकर्ता। लिङा वा
धामाभूदिति कृत्यतृचोर्विधिः। भव्यगेयप्रवचनीयोपस्थानीयजन्याप्लाव्यापात्या वा। एते
कृत्यांताः कर्तरि वा निपात्यंते। पक्षे तयोरेवेति सकर्मकात्कर्मणि। अकर्मकात्तु भावे ज्ञेयाः। भव
तीति भव्यः। भव्यमनेन वा। गायतीति गेयः साम्नामयं। गेयं साम्नानेन वा। इत्यादि। शकि लिङ् च।

वात्कृत्याः। वोढुं शक्यो वोढव्यः। वहनीयो वा स्युः। लिङ्बाधा मा भूदिति कृत्योक्तिः। ल्यापवादने
नैव ज्ञापनसंभवे प्रैषादिसूत्रे कृत्याश्चेति सूत्ययत्नः। अर्हे कृत्यतृचोऽग्रहणं॥ ॥इति कृत्यप्रक्रि
या॥ ॥ण्वुल्तृचौ। रेतौ स्तः। कर्त्तरि कृदिति कर्त्रर्थे। युवोरनाकौ। कारकः कर्त्ता। वोढुमर्हो वोढा। कारिका
कर्त्री। गाङ्कुटेति ङित्वं। कुटिता। अमिन्विदित्युक्तेर्न ङित्वं। कोटकः। विजइट्। विजिता। हनस्तोऽचिण्णलोः।
घातकः। आतो युक्। दायकः। नोदात्तोपदेशस्येति न वृद्धिः। शमकोदकैः मे। अनिटस्तु नियामकः। जनि
वध्योश्चाजनकः। वध हिंसायां। वधकः। रधिजभोरचि। रंधकः। जंभकः। नेड्वशिकृति। रधेः। रधिता।
रद्धा। मस्जिनशोर्झलीति नुम्। मङ्क्ता। नंष्टा। नशिता। रभेरशब्लिटोः। रंभकः। रब्धा। लभेश्च। लंभकः। लब्धा।

सि०कौ०उ०कृ०

१८५

तीषसहा।एषिता।एष्टा।सहिता।सोढा।दरिद्रातेरालोपः।दरिद्रिता।ण्वुलि।नादरिद्रायकः।कृत्यल्यु
टइत्येव सूत्रमस्तु।यत्रविहितास्ततोऽन्यत्रापिस्युरित्यर्थात्।एवंचबहुलग्रहणंयोगविभागेनसू
त्रमात्रस्यार्थव्यभिचारार्थं।पादाभ्यांह्रियतेपादहारकः।कर्मणिण्वुल्।क्रमेःकर्त्तर्यात्मनेपदविषया
त्।कृतइणिषेधोवाच्यः।प्रक्रंता।कर्त्तरीतिकिं।प्रक्रमितव्यं।आत्मनेपदेतिकिं।संक्रमिता।अनन्य
भावेविषयशब्दः।तेनानुपसर्गाद्वेतिविकल्पार्हस्यमनिषेधः।क्रमिता।तदर्हत्वमेवतद्विषयत्वं।ते
नक्रंतेत्यपीतिकेचित्।गमेरिडित्यत्रपरस्मैपदग्रहणंतङानयोरभावंलक्षयति।संजिगमिषिता।
एवन्तरक्षस्यतुमर्थः।विवत्सिता।यङंताण्वुल्।अल्लोपस्यस्थानिवत्त्वान्नवृद्धिः।पापचकः।यङ्लुगं

राम

१०

तान्तु। पापावकः। नंदिग्रहिपचादिभ्यो ल्युणिन्यचः। नंद्यादेर्ल्युः ग्रहादेर्णिनिः पचादेरच् स्यात्। नंद
यतीति नंदनः। जनं अर्दयतीति जनार्दनः। मधुसूदनः। विशेषेण भीषयतीति विभीषणः। लवणः।
नंद्यादिगणे निपातनाण्णत्वं। ग्राही। स्थायी। मंत्री। विशायी। वृध्यभावो निपातनात्। विषयी। दृषत्व
मपि। परिभावी। परिभवी। पाक्षिको वृध्यभावो निपात्यते। पचादिराकृतिगणः। शिवशमरिष्टस्य
करे कर्मणि घटोऽठच्। इति सूत्रयोः करोतेर्घटेश्च अप्रत्यययोगात्। अप्रत्यये परे यङ्लुग्विधानाच्च।
केषांचित्पाठस्तु अनुबंधासंजनार्थः। केषांचित्प्रपंचार्थः। केषांचिद्बाधकबाधनार्थः। पचतीति प
चः। नदट्। चोरट्। देवट्। इत्यादयष्टितः। नदी। चोरी। देवी। दीव्यतेरिगुपधेति कः। प्रायः। जारभराश्वप

वाऽसनयोः कर्मण्यण् एरजाप्तः। न्यंक्वादिषु पाठात् स्वपाकोपि। यङोऽचि चेति लुक्। न धातुलोप इति गु
ण वृद्धि निषेधः। वेक्रियः। नेन्यः। लोलुवः। पोपुवः। मरीमृजः। चरिचलिपतिवदीनां वा द्वित्वमच्या
क्चाभ्यासस्येति वक्तव्यं। आगमस्य दीर्घत्वसामर्थ्याद् अभ्यासह्रस्वो हलादिशेषश्च न। चराचरः। च
लाचलः। पतापतः। वदावदः। हंतेर्घत्वं वा। घत्वमभ्यासस्य उत्तरस्य तु अभ्यासाच्चेति कुत्वं। घनाघ
नः। पाटेर्णिलुक्चूक्दीर्घश्चाभ्यासस्य। पाटूपटः। पक्षे चरः चलः पतः वदः हनः पाटः। राजेः कू
तीति वा नुम्। राजिंवरो राजिवरः। इगुपधज्ञाप्रीकिरः कः। एभ्यः कः स्यात्। क्षिपः। लिखः। बुधः।
कृशः। ज्ञः। प्रीणातीति प्रियः। किरतीति किरः। वासरूपविधिना ण्वुल्तृचावपि। क्षेपकः। क्षेप्ता। आ

तश्चोपसर्गे। कः स्यात्। श्याद्व्यधेति णस्यापवादः। सुग्लः। प्रज्ञः। पाघ्राध्माधेट्दृशः शः। पिबतीति
पिबः। जिघ्रः। धमः। धयः। धया कन्या। धेटष्टित्वात्स्तनंधयीति खशीवङी ध्माप्तः। खशोन्यत्र नेष्य
तइति हरदत्तः। पश्यतीति पश्यः। घ्रः संज्ञायां न। व्याघ्रादिभिरिति निर्देशात्। अनुपसर्गाल्लिंपविंदधा
रिपारिवेदिउदेजिचेतिसातिसाहिभ्यश्च। शः स्यात्। लिंपः। विंदः। धारयः। पारयः। वेदयः। उदेजयः। चेत
यः। सातिः सुखार्थः। सौत्रो हेतुमण्यंतः। सातयः। वासरूपन्यायेन क्विपि सात्। परमात्मा। सात्वंतो
न क्ताः। षह मर्षणे। चुरादिः हेतुमण्यंतो वा। साहयः। अनुपसर्गात्किं। प्रलिपः। नौ लिंपेर्वाच्यः। निलि
पा देवाः। गवादिषु विंदेः संज्ञायां। गोविंदः। अरविंदः। ददातिदधात्योर्विभाषा। शः स्यात्। ददः। दधः। प

सि०कौ०उ०कृ०

१८१

क्षे वक्ष्यमाणे णः। अनुपसर्गादित्येव। प्रदः। प्रधः। ज्वलितिकसंतेभ्यो णः। इतिशब्दः आद्यर्थः। ज्वला
दिभ्यः कसंतेभ्यो णः स्याद्वा पक्षेऽच्। ज्वालः। ज्वलः। चालः। चलः। अनुपसर्गादित्येव। उज्ज्वलः। त
नेरुपसंख्यानं। इहानुपसर्गादिति विभाषेति च न संबध्यते। अवतनोतीत्यवतानः। श्याद्व्यधास्रु
संस्रुतीणवसावहृलिहश्लिषश्वसश्च। श्यैङ् प्रभृतिभ्यो नित्यं णः स्यात्। श्यैङोऽवस्यते स्वादंतत्वात्सि
द्धे पृथग्ग्रहणं उपसर्गे कं बाधितुं। अवश्यायः। प्रतिश्यायः। आत्। दायः। धायः। व्याधः। स्रु गतौ। आ
ङ्पूर्वः संपूर्वश्च। आस्रावः। संस्रावः। अत्यायः। अवसायः। अवहारः। लेहः। श्लेषः। श्वासः। दुन्योरनुप
सर्गे। णः स्यात्। दुनोतीति दावः। नीसाहचर्यात्सानुबंधकात् दुनोतेरेव णः। दवतेस्तु पचाद्यच्। दवः। न

राम

१२

यतीति नायः। उपसर्गे तु प्रदवः। प्रणयः। विभाषा ग्रहः। णो वा पक्षेऽच्। व्यवस्थितविभाषेयं। तेन जल
चरे ग्राहः। ज्योतिषि ग्रहः। भवतेश्चेति काशिका। भवो देवः संसारश्च। भावाः पदार्थाः। भाष्यमते तु प्रा
प्र्यर्थाद्भु ण्यादि एयंतादच्। भावः। गेहे कः। गेहे कर्त्तरि ग्रहेः कः स्यात्। गृह्णाति धान्यादिकमिति गृहम्।
तास्थ्याद् गृहाः। दाराः। शिल्पिनि ष्वुन्। क्रियाकौशलं शिल्पं तद्वति कर्त्तरि ष्वुन् स्यात्। नृतिखनिरञ्जिभ्य
एवा। नर्त्तकः। नर्त्तकी। खनकः। खनकी। ऽस्मिन्ऽके ऽनेव रंजेर्नलोपो वाच्यः। रजकः। रजकी। भाष्यमते तु
नृतिखनिभ्यामेव ष्वुन्। रंजेस्तु क्वुन्। शिल्पिनि संज्ञयोरिति क्वुन्। टाप्। रजिका। पुंयोगे तु रजकी। गस्थक
न्। गायतेस्थकन् स्यात् शिल्पिनि कर्त्तरि। गाथकः। ण्युट् च। गायनः। टित्वा ङीप् गायनी। हश्च व्रीहिकालयोः। ह

सिं०कौ० उ०कृ०

१८८

को हाङः ण्युट् स्यात् व्रीहौ काले च कर्त्तरि। जहात्युदकमिति हायनो व्रीहिः। जहाति भावानिति हायनो व
र्षः। जिहीते प्राप्नोतीति वा॥ प्रुसृल्वः समभिहारे वुन्। समभिहारग्रहणेन साधुकारित्वं लक्ष्यते। प्रवकः।
सरकः। लवकः॥ आशिषि च॥ आशीर्विषयार्थवृत्तेर्धातोर्वुन् स्यात्कर्त्तरि। जीवतात् जीवकः। नंदतात् नंद
कः। आशीः प्रयोक्तृधर्मः। आशास्तिस्तु पित्रादेरियमुक्तिः। कर्मण्यण्। कर्मण्युपपदे धातोरण् प्रत्ययः
स्यात्। उपपदसमासः। कुंभं करोतीति कुंभकारः। आदित्यं पश्यतीत्यादावनभिधानान्नाण्॥ शीलिकामि
भक्ष्याचरिभ्यो णः। अणोऽपवादार्थं वार्त्तिकं। मांसशीला। मांसकामा। मांसभक्षा। कल्याणाचारा। ईक्षि
क्षमिभ्यां च। सुखप्रतीक्षा। बहुक्षमा। कथं तर्हि गंगाधरभूधरादयः। कर्मणः शेषत्वविवक्षया भवि

राम

१३

ष्यंति। ह्वावामश्च॥ अण् स्यात् कापवादः। स्वर्गह्वायः। तन्तुवायः। धान्यमायः। आतोऽनुपसर्गे कः॥ आदं
ताद्धातोरनुपसर्गात्कर्मण्युपपदे कः स्यान्नाण्। आतोऽनुपसर्गे कः। गोदः। पार्ष्णित्रं। अनुपसर्गे किं। गोसं
दायः॥ कविधौ सर्वत्र प्रसारणिभ्यो डः॥ ब्रह्मजिनातिब्रह्मज्यः। सर्वत्र ग्रहणात् आतश्चोपसर्गे॥ आ
ह्वः। प्रह्वः॥ सुपि स्थः॥ सुपीति योगो विभज्यते। सुपि उपपदे आदन्तात्कः स्यात्। द्वाभ्यां पिबतीति द्विपः। स
मस्थः विषमस्थः। ततः स्थः॥ सुपि तिष्ठतेः कः स्यात्। आरंभसामर्थ्याद्भावे। आखूनामुत्थानमाखू
त्थः॥ प्रष्ठोऽग्रगामिनि॥ प्रतिष्ठतीति प्रष्ठो गौः। अग्रतो गच्छतीत्यर्थः। अग्र इति किं। प्रस्थः। [135] अंबाम्बगो
भूमिसव्यापद्वित्रिकुशेकुशंक्वंगुमंजिपुंजिपरमेबर्हिर्दिव्यग्निभ्यः स्थः॥ स्थ इति कप्रत्ययान्तस्यानु

सि॰ कौ॰ उ॰ कृ॰
१८९

करणे। षष्ठ्यर्थे प्रथमा। एभ्यः स्थस्य सस्यपः स्यात्। द्विष्ठः। त्रिष्ठः। इत ऊर्द्ध्वं कर्मणि सुपीति द्वयम
प्यनुवर्त्तते। तत्रा कर्मकेषु सुपीत्यस्य संबंधः। तुंदशोकयोः परिमृजापनुदोः। तुंदशोकयोः कर्म
णोनुपपदयोः आभ्यां कः स्यात्। आलस्य सुखाहरणयोरिति वक्तव्यं। तुंदं परिमार्ष्टीति तुंदप
रिमृजो लसः। शोकापनुदः। सुखस्याहर्त्ता। अलसादन्यत्र तुंदपरिमार्ज एवा। यस्तु संसारासार
त्वोपदेशेन शोकमपनुदति स शोकापनोदः। कप्रकरणे मूलविभुजादिभ्य उपसंख्यानं। मूलानि
विभुजति मूलविभुजो रथः। आकृतिगणोयं। महीध्रः। कुध्रः। गिलतीति गिलः। प्रेदाज्ञः। दारूपा
ज्ञोनाते स्थ बोपसृष्टा। कर्मण्युपपदे कः स्यादणोपवादः। सर्वप्रदः। पथिप्रज्ञः। अनुपसर्गे

राम
१४

तेरिन्। व्रीहिवत्सयोरिति वक्तव्यम्। स्तंबकरिर्व्रीहिः। शकृत्करिर्वत्सः। व्रीहिवत्सयोः किं। स्तंबकारः
शकृत्कारः। हरतेर्दृतिनाथयोः पशौ। दृतिनाथयोरुपपदयोर्हृञः इन्स्यात् पशौ कर्त्तरि। दृतिं हरती
ति दृतिहरिः। नाथं नासारज्जुं हरतीति नाथहरिः। पशौ किं। दृतिहारः नाथहारः। फलेग्रहिरात्मंभ
रिश्च। फलानि गृह्णातीति फलेग्रहिः। उपपदस्य एदंतत्वं ग्रहेरिन्प्रत्ययश्च निपात्यते। आत्मानं बि
भर्तीति आत्मंभरिः। आत्मनो मुमागमः। भृञ इन्। चात्कुक्षिंभरिः। वा० स्तु आत्मोदरकुक्षिषु
इति पेठुः। ज्योस्माकरंभमुदरंभरयश्च कोऽयमिति मुरारिः। एजेः खश्। एजयंतादेजेः खश् स्यात्। अरु
र्द्विषदजंतस्य मुम्। अरुतो द्विषतोऽजंतस्य च मुमागमः स्यात् खिदंते उत्तरपदे न त्वव्ययस्य। खित्वा

अनुर्वीधस्य केवलेनचरितार्थ[redacted]खेतनम चातियथापणमयति· अचश्रुद्धपालावजमाने त्वस्य चारितार्थ्यं।।

छ्वादि। जनंएजयतीतिजनमेजयः। वातशुनीतिलशर्द्धेष्वजधेट्तुदजहातिभ्यः खश् उपसंख्यानं।
वातमजा मृगाः। खित्यनव्ययस्य। खिदंते परे पूर्वपदस्य ह्रस्वः स्यात्। ततो मुम्। मुनिंधयः। तिलंतुदः।
शर्द्धंजहा माषाः। शर्द्धः पानशब्दः तंजहातीति विग्रहः। जहातिरंतर्भावितण्यर्थः। नासिकास्तनयोर्ध्मा
धेटोः। अत्र वार्त्तिकं। स्तने धेटः इति वक्तव्यं। नासिकायां ध्मश्चेति वाच्यं। स्तनंधयतीति स्तनंधयः। धेट
ष्टित्वात् स्तनंधयी। नासिकंधमः। नासिकंधयः। नाडीमुष्ट्योश्च। एतयोः कर्मणे उपपदयोः ध्माधे
टोः खश् स्यात्। यथासंख्यं नेष्यते। नाडिंधमः। नाडिंधयः। मुष्टिंधमः। मुष्टिंधयः। घटीखारीखरी
षूपसंख्यानं। घटिंधमः। घटिंधयः। इत्यादि। खारी परिमाणविशेषः। खरी गर्दभी। उदि कूले रु

राम
७

जि वहोः। उत्पूर्वाभ्यां रुजिवहिभ्यां कूले कर्मण्युपपदे खश् स्यात्। कूलं उद्रुजतीति कूलमुद्रुजः। कू
लमुद्वहः। वहाभ्रे लिहः। वहः स्कंधः तं लेढीति वहंलिहो गौः। अदादित्वाच्छपो लुक्। खशो ङित्वान्न गु
णः। अभ्रंलिहः। वायुः। परिमाणे पचः। प्रस्थंपचा स्थाली। खारिंपचः कटाहः। मितनखे च। मितंपचा
ब्राह्मणी। नखंपचा यवागूः। पचिरत्र तापवाची। विध्वरुषोस्तुदः। विधुंतुदः। मुमि कृते संयोगांतस्य
लोपः। अरुंतुदः। असूर्यललाटयोर्दृशितपोः। असूर्यमित्यसमर्थसमासः। दृशिना नञः संबंधात्।
सूर्यं न पश्यंतीत्यसूर्यंपश्या राजदाराः। ललाटंतपः सूर्यः। उग्रंपश्येरंमदपाणिंधमाश्च। एते निपा
त्यंते। उग्रमिति क्रियाविशेषणं तस्मिन्नुपपदे दृशेः खश्। उग्रं पश्यतीत्युग्रंपश्यः। इरा उदकं। तेन माद्य

तिराप्यतेऽविंध्यनत्वादिति इरंमदो मेघज्योतिः। इह निपातनात् श्यन्। पाणयो ध्मायंतेऽस्मिन्निति पा
णिंधमोऽध्वा। अंधकारावृतः इत्यर्थः। तत्र हि सर्पाद्यपनोदनाय पाणयः ध्मायंते। प्रियवशे वदः
खच्। प्रियंवदः। वशंवदः। गमेस्सुपि वाच्यः। असंज्ञार्थमिदं। मितंगमो हस्ती। विहायसो विह इति वाच्यो।
खच्च डिद्वा वाच्यः। विहंगमः। विहगः। भुजंगमः। भुजंगः। द्विषत्परयोस्तापेः। खच्स्यात्। खचि ह्रस्वः। ख
च्परे णौ उपधाया ह्रस्वः स्यात्। द्विषंतं परं वा तापयति द्विषंतपः। परंतपः। खचः परिग्रह एव लिंग
विशिष्टपरिभाषा अनित्या। तेनेह न। द्विषतीं तापयतीति द्विषतीतापः। वाचि यमो व्रते। वाक्शब्दे उ
पपदे यमेः खच्स्याद्व्रते गम्ये। वाचंयमपुरंदरौ च। वाक्पुरोरमंतत्वं निपात्यते। वाचंयमो मौनव्रती। व

तेति। अस्मात्स्यादिना वाचंयच्छतीति वाग्यामः। पूःसर्वयोर्दारिसहोः। पुरं दारयतीति पुरंदरः। स
र्वंसहः। सहि ग्रहणे मर्षणार्थम्। भगे च दारेरिति काशिका। बाहुलकेन लब्धमिदमित्याहुः। भगं
दारयतीति भगंदरः। सर्वकूलाभ्रकरीषेषु कषः। सर्वंकषः खलः। कूलंकषा नदी। अभ्रंकषो वा
युः। करीषंकषा वात्या। मेघर्त्तिभयेषु कृञः। मेघंकरः। अर्त्तिंकरः। भयंकरः। भयशब्देन तदंतवि
धिः। अभयंकरः। क्षेमप्रियमद्रेऽण्च। एषु कृञोऽण्स्यात् वा खच्। क्षेमंकरः क्षेमकारः। प्रियंकरः
प्रियकारः। मद्रंकरो मद्रकारः। वेति वाच्येऽण्ग्रहणं हेत्वादिषु टो माभूदिति। कथं तर्हि अल्पारंभाः
क्षेमकरा इति। कर्मणः शेषत्वविवक्षायां पचाद्यच्। आशिते भुवः करणभावयोः। आशितंभ

हे उपपदे भवतेः खच्॥ आश्रितो भवत्यनेनाश्रितंभवः॥ उदनः॥ आश्रितस्य भवनं आश्रितंभवः॥ सं
ज्ञायां भृतृवृजिधारिसहितपिदमः॥ विश्वं बिभर्तीति विश्वंभरः॥ विश्वंभरा॥ रथंतरं साम॥ इह रथे
न तरतीति व्युत्पत्तिमात्रं न त्ववयवार्थानुगमः॥ पतिंवरा कन्या॥ शत्रुंजयो हस्ती॥ युगंधरः पर्वतः॥
शत्रुंसहः॥ शत्रुंतपः॥ अरिंदमः॥ दमिः शमनायां तेन सकर्मक इत्युक्तं॥ मतांतरे तु॥ अंतर्भावित
ण्यर्थोऽत्र दमिः॥ गमश्च॥ सुतंगमः॥ अंतात्यंताध्वदूरपारसर्वानंतेषु डः॥ संज्ञायामिति निवृत्तं॥
एषु गमेर्डः स्याद्॥ डित्वसामर्थ्यादभस्यापि टेर्लोपः॥ अंतं गच्छतीत्यंतग इत्यादि॥ सर्वत्र पन्नयो
रुपसंख्यानं॥ सर्वत्रगः॥ पन्नं पतितं गच्छतीति पन्नगः॥ पन्नमिति पद्यतेः क्तांतं क्रियाविशेषणं॥

उरसो लोपश्च। उरसा गच्छतीत्युरगः। सुदुरोरधिकरणे। सुखेन गच्छत्यत्र सुगः। दुर्गः। अन्यत्रापि
दृश्यते इति वक्तव्यं। ग्रामतः। डे च विहायसो विहादेशो वक्तव्यः। विहगः। आशिषि हनः। शत्रुं वध्याच्छत्रु
हः। आशिषि किं। शत्रुघातः। दारावाहनोऽणन्तस्य च टः संज्ञायां। दारुशब्दे उपपदे आङ्पूर्वाद्धन्तेरण्
टकारश्चान्तादेशो वक्तव्य इत्यर्थः। दार्वाघाटः। चारौ वा। चार्वाघाटः। चार्वाघातः। कर्मणि समि च। कर्मण्यु
पपदे संपूर्वाद्धन्तेरुक्तं चेत्यर्थः। वर्णान्संहन्तीति वर्णसंघाटः। वर्णसंघातः। पदसंघाटः। पदसंघातः। अ
पे क्लेशतमसोः। अपपूर्वाद्धन्तेर्डः स्यात्। अनाशीरर्थमिदं। क्लेशापहः पुत्रः। तमोपहः सूर्यः। कुमारशी
र्षयोर्णिनिः। कुमारघाती। शिरसः शीर्षभावो निपात्यते। शीर्षघाती। लक्षणे जायापत्योष्टक्। हन्ते

सि० कौ० कृ० प्र०
१९५

ष्टक्स्यात् लक्षणवति कर्तरि। जायाघ्नो ना। पतिघ्नी स्त्री। अमनुष्यकर्तृके च। जायाघ्नस्तिल
कालकः। पतिघ्नी पाणिरेखा। पित्तघ्नं घृतं। अमनुष्येति किं। आखुघातः शूद्रः। अथ कथं ब
लभद्रः प्रलंबघ्नः शत्रुघ्नः कृतघ्न इत्यादि। मूलविभुजादित्वात्सिद्धं। चोरघातो नरघातो हस्ती
ति तु बाहुलकादिति। शक्तौ हस्तिकपाटयोः। हन्तेष्टक्स्यात् शक्तौ द्योत्यायां मनुष्यकर्तृकार्थ
मिदं। हस्तिघ्नो ना। कपाटघ्नश्चोरः। कवाटेति पाठान्तरं। पाणिघताडघौ शिल्पिनि। हन्तेष्टक् टि
लोपो घत्वं च निपात्यते पाणिताडयोरुपपदयोः। शिल्पिनि किं। पाणिघातः। ताडघातः। राजघ राम
उपसंख्यानं। राजानं हन्ति राजघः। आढ्यसुभगस्थूलपलितनग्नान्धप्रियेषु च्व्यर्थेष्वच्वौ कृ २०

ः करणे ख्युन्॥ एषु च्व्यर्थेष्वच्व्यंतेषु कर्मसूपपदेषु कृञः ख्युन् स्यात्॥ अनाढ्यमाढ्यं कुर्वत्यने
न आढ्यंकरणं॥ अच्वौ किं॥ आढ्यीकुर्वत्यनेन॥ इह प्रतिषेधसामर्थ्यात् ल्युडपि नेति काशिका॥
भाष्यमते तु ल्युट् स्यादेव॥ अच्वावित्तु नरार्थम्॥ कर्त्तरि भुवः खिष्णुच् खुकञौ॥ आढ्यादिषु च्व्यर्थेष्वच्व्यंते
षु भवतेरेतौ स्तः॥ अनाढ्य आढ्यो भवति आढ्यंभविष्णुः आढ्यंभावुकः॥ स्पृशोऽनुदके क्विन्॥ घृतस्पृक्॥
कर्मणीति निवृत्तं मंत्रेण स्पृशतीति मंत्रस्पृक्॥ ऋत्विग्दधृक्॥ व्याख्यातं॥ त्यदादिषु दृशोऽनालोचने
कञ्च॥ समानान्ययोश्चेति वाच्यं॥ सदृक् सदृशः॥ अन्यादृक् अन्यादृशः॥ दृक्षे पि वाच्यः॥ तादृक्षः॥ सदृक्षः॥
अन्यादृक्षः॥ सत्सूद्विषद्रुहदुहयुजविदभिदछिदजिनीराजामुपसर्गेऽपि क्विप्॥ एभ्यः क्विप् स्यात्

उपसर्गे सत्यसति च सुप्युपपदे। द्युसत्। उपनिषत्। अंडसूः। प्रसूः। मित्रद्विट्। प्रद्विट्। मित्र
ध्रुक्। प्रध्रुक्। गोधुक्। प्रधुक्। अश्वयुक्। प्रयुक्। वेदवित्। निवित्। इत्यादि। अग्रग्रामाभ्यां नय
तेर्णो वाच्यः। अग्रणीः। ग्रामणीः। भजो ण्विः। अंशभाक्। प्रभाक्। अदोऽनन्ने विट् स्यात्। आममत्ति
मोऽत्। सस्यात्। अनन्ने किं। अन्नादः। क्रव्ये च। अदेर्विट्। पूर्वेण सिद्धे वचनमण्बाधनार्थम्।
क्रव्यात्। आममांसभक्षकः। कथं तर्हि। क्रव्यादोऽस्रप आशिर इति। पक्वमांसशब्दे उपपदेऽण्। उ
पपदस्य क्रव्यादेशः पृषोदरादित्वात्। दुहः कब्घश्च। कामदुघा। अन्येभ्योऽपि दृश्यंते। छंदसीति
निवृत्तं। मनिन्क्वनिप्वनिप्विच् एते प्रत्यया धातोः स्युः। नेड्वशि कृति। वशादेः कृत इट् न स्यात्। राम
२१

दः। सुशर्मा। ज्ञातरि त्वा। विद्वनोऽनुनासिकस्यात्। अनुनासिकस्य आ स्यात्। विजायत इति वि
जावा। उरारः। अवावा। विबू। रोटू। रेट्। सुगण्। क्विप्। अयमपि दृश्यते। सस्य द्विषेति त्वस्येव प्र
पंवः। उखास्रत्। पर्णध्वत्। वाहऽखट्। अंतः। पदांतस्यानितेर्नस्य णत्वं स्यात् उपसर्गस्थानि
मित्तात्परस्येत्। हे ग्राम्। णी। शास इदिति त्वं। मित्राणि शास्ति मित्रशीः। आशासः क्वावुपधाया इत्वं वा
च्यो। आशीः। इत्वो त्वो। गीः। पूः। इस्मन्त्रन्क्विषु च। एषु छादेर्ह्रस्वः स्यात्। तानुबन्धत्। अनुनासिकस्य
क्वीति दीर्घः। मो नो धातोः। प्रतान्। प्रशान्। च्छ्वोः शूडू। अक्षद्यूः। ज्वरत्वरेत्यूठ्। जूः। जूरौ। तूः। स्रूः।
ऊः। जनानवतीति जनोः। जनावौ। जनावः। सुवौ। सुवः। सुमः। सुस्वौ। सुम्वः। राज्ञो पः। मुर्छा। मूः। सु

सि० कौ० उ० कृ०

१६७

रेः। सुरः। ध्वरीध्वः। गमः क्वौ। अनुनासिकलोपः स्यात्। अंगगत्। गमादीनामिति वक्तव्यं। प
रीतत्। संयत्। सुनत्। ऊङ् च गमादीनामिति वक्तव्यं। लोपश्च। अग्रेगूः। अग्रेभ्रूः। स्थः क च। वा। वार्त्ति
पू। संस्थः संस्थाः। शमि धातोरित्यवं बाधितुं सूत्रं। सुप्यजातौ णिनिस्ताच्छील्ये। अजात्यर्थे सुपि
धातोर्णिनिः स्यात्ताच्छील्ये। उष्णभोजी। शीतभोजी। अजातौ किं। ब्राह्मणानामंत्रयिता। ताच्छी
ल्ये किं। उष्णं भुंक्ते कदाचित्। इह वृत्तिकारः उपसर्गभिन्न एव सुपि णिनिरिति व्याख्याय उत्प्र
तिभ्यामाङि सर्तेरुपसंख्यानमिति पठितं। हरदत्तमाधवादिभिश्च देवानुसृतं। एतच्च भाष्य
विरोधादुपेक्ष्यं। प्रसिद्धश्चोपसर्गे पि णिनिः। सवभ्रूवो पजीविनां। अनुयायिवर्गः। पतत्यधो धा

राम
२२

मविस्मारि। नवंवनीयाः प्रभवो नुज्ञी। णिनिः। इत्यादौ। साध्वुकारि ण्युप संख्यानं। ब्रह्मणि वदः। अताच्छील्यार्थवार्त्तिकद्वयं। साधुदायी। ब्रह्मवादी। कर्त्तर्युपमाने। णिनिः स्यात्। उपपदार्थः कर्त्ता प्रत्ययार्थस्य कर्त्तुरुपमानं। उष्ट्र इव क्रोशति उष्ट्रक्रोशी। ध्वांक्षरावी। अताच्छील्यार्थमिदं सूत्रं। कर्त्तरि किं। अपूपानिव भक्षयति माषान्। उपमाने किं। उष्ट्रः क्रोशति। व्रते। णिनिः स्यात्। स्थंडिलशायी। बहुलमाभीक्ष्ण्ये। पौनः पुन्ये द्योत्ये सुप्युपपदे णिनिः। क्षीरपायिण उशीनराः। मनः। सुपि मन्यतेर्णिनिः स्यात्। दर्शनीयमानी। आत्ममाने खश्च। सकर्मके मनने वर्त्तमानान्मन्यतेः सुपि खश्च स्यात् णिनिः। पंडितमात्मानं मन्यते पंडितंमन्यः। पंडितमानी। खित्यनव्ययस्य। कालिंमन्या। अन

सि॰ कौ॰ उ॰ पू॰
१९८

व्ययस्य क्विं। दिवामन्या। इवएकाचों प्रत्ययवत्। इजंतादेकाचो ऽम्प्रत्ययवत्स्यात्स्वाप्यन्वश्विदंतेपरे।
आत्मन्श्रसो। गांमन्यः। वामन्श्रसो। स्त्रियंमन्यः। स्त्रीमन्यः। न्वतरंमन्यः। भुवंमन्यः। श्रियमात्मा
नंमन्यते श्रिमन्यंकुलं। भाष्यकारवचनात् श्रीशब्दस्य ह्रस्वः मुममोरभावश्च। भूतो ऽधिकारोयं।
वर्त्तमाने लडितियावत्। करणे यजः। करणे उपपदे भूतार्थाद्यजेर्णिनिः स्यात्कर्त्तरि। सोमेनेष्टवा
न् सोमयाजी। अग्निष्टोमयाजी। कर्मणि हनः। पितृव्यघाती। कर्मणीत्येतत्सहेवेतियावदधिक्रियते। ब्रह्म
भ्रूणवृत्रेषु क्विप्। एषु कर्मसूपपदेषु हंतेर्भूते क्विप्स्यात्। ब्रह्महा। भ्रूणहा। वृत्रहा। क्विपेत्येव सिद्धे
नियमार्थमिदं। ब्रह्मादिष्वेव। हंतेरेव। भूत एव। क्विबेवेति। चतुर्विधोत्र नियमइति काशिका। ब्रह्मादि राम
२३

ष्वेव क्विबेवेति द्विविधो नियम इति भाष्यं। सुकर्मपापमंत्रपुण्येषु कृञः। सुकर्मादिषु च कृञः क्विप्स्यात्।
त्रिविधोत्र नियम इति काशिका। सुकृत्। कर्मकृत्। पापकृत्। मंत्रकृत्। पुण्यकृत्। क्विबेवेति नियमा
त्कर्मकृतवानित्यत्राण्न। कृञ एवेति नियमान्मंत्रमधीतवान्मंत्राध्यायः। अत्र न क्विप्। भूत एवेति नि
यमात्। मंत्रं करोति करिष्यति वेति विवक्षायां न क्विप्। स्वादिष्वेवेति नियमाभावादन्यस्मिन्नप्युपप
दे क्विप्। शास्त्रकृत्। भाष्यकृत्। सोमे सुञः। सोमसुत्। चतुर्विधोत्र नियम इति काशिका। एवमुत्तरसू
त्रेपि। अग्नौ चेः। अग्निचित्। कर्मण्यग्न्याख्यायां। कर्मण्युपपदे कर्मण्येव कारके चिनोतेः क्विप्स्यात्। अग्न्या
धारस्थलविशेषस्याख्यायां। श्येन इव चितः श्येनचित्। कर्मणीनि विक्रियः। कर्मण्युपपदे विपूर्वात्क्रीण

तेरिनिः स्यात्। कुत्सितग्रहणं कर्तव्यं। सोमविक्रयी। घृतविक्रयी। दृशेः क्वनिप्। कर्मणि भूत इत्येव।
पारं दृष्टवान् पारदृश्वा। राजनि युधि कृञः। क्वनिप् स्यात्। युधिरंतर्भावितण्यर्थः। राजानं योधितवान्।
राजयुध्वा। राजकृत्वा। सहे च। कर्मणीति निवृत्तं। सहयुध्वा। सहकृत्वा। सप्तम्यां जनेर्डः। सरसिजं। मंदु
रायां जातो मंदुरजः। ङ्याप्पोरिति ह्रस्वः। पंचम्यामजातौ। जातिशब्दवर्जिते पंचम्यंत उपपदे जनेर्डः स्या
त्। संस्कारजः। अदृष्टजः। उपसर्गे च संज्ञायां। प्रजा स्यात् संततौ जनने। अनौ कर्मणि। अनुपूर्वाज्जनेः
कर्मण्युपपदे डः स्यात्। पुमांसमनुरुध्य जाता पुमनुजा। अन्येष्वपि दृश्यते। अन्येष्वप्युपपदेषु ज
नेर्डः स्यात्। अजः। द्विजः। ब्राह्मणजः। अपिशब्दः सर्वोपाधिव्यभिचारार्थः। तेन धात्वंतरादपि क। राम
२४

रकांतरेष्वपि क्वचित्। परितः खाता परिखा। क्तक्तवतू निष्ठा। एतौ निष्ठासंज्ञौ स्तः। निष्ठा भूतार्थव्य
त्तेर्घ्यातो निष्ठा स्यात्। तत्र तयोरेवेति भावकर्मणोः क्तः। कर्त्तरि कृदिति कर्त्तरि क्तवतुः। उकावितौ। स्ना
तं मया। स्तुतस्त्वया विष्णुः। विष्णुर्विश्वं कृतवान्। निष्ठायामण्यदर्थे। ण्यदर्थो भावकर्मणी ततोऽन्यत्र नि
ष्ठायां क्षियो दीर्घः स्यात्। क्षियो दीर्घात्। दीर्घात् क्षियो निष्ठातस्य नः स्यात्। क्षीणवान्। भावकर्मणोः स्तु
क्षितः कामो मया। श्रुकः किति। श्रितः श्रितवान्। भूतः भूतवान्। स्नुतः। ऊर्णोतेर्वृद्धौ वा च्यः। तेन एका
वृत्त्वान्नेट्। ऊर्णुतः। नुतवत् नुतः। रदाभ्यां निष्ठातो नः पूर्वस्य च दः। रेफदकाराभ्यां परस्य निष्ठातस्य नः
स्यात्। निष्ठापेक्षया पूर्वस्य धातोर्दकारस्य च हिंसायां। शृ। शतद्रुत्। रपरः। णत्वं। शीर्णः। बहिरंग

सि० कौ० उ० कृ०

२००

त्वेन वृद्धे रसिद्धत्वान्नेह। कृतस्यापत्यं कार्त्तिः। भिन्नः। छिन्नः। संयोगादेरातो धातोर्यण्वतः। निष्ठातस्य नः
स्यात्। द्राणः। ग्लानः। ल्वादिभ्यः। एकविंशतेर्लूञादिभ्यः प्राग्वत्। लूनः। ज्या। ग्रहि ज्या। जीनः। दुग्वोर्दी
र्घश्च। दु गतौ। दूनः। टुदु उपतापे इत्ययं तु न गृह्यते सानुबंधत्वात्। मृदुतया दुतयेति माघः। पूञो वि
नाशे। पूना यवाः विनष्टा इत्यर्थः। पूतमन्यत्। सिनोतेर्ग्रास कर्मकर्तृकस्य। सिनो ग्रासः। ग्रासेति
किं। सिता पाशेन सूकरः। कर्मकर्तृकेति किं। सितो ग्रासो देवदत्तेन। उदितश्च। भुजो। भुग्नः। टुओश्वि
उच्छूनः। ओहाक्। प्रहीणः। स्वादय उदित इत्युक्तं। सूनः सूनवान्। दूनः दूनवान्। उदित्स्वप्येडाऽऽः पा
ठ सामर्थ्यान्नेट्। उड्डीनः। द्रवमूर्त्तिस्पर्शयोः श्यः। द्रवस्य मूर्त्तौ काठिन्ये स्पर्शे वार्थे श्येङः संप्रसा

राम २५

रणं स्यान्निष्ठायां। श्योऽस्पर्शे। श्योऽङ्गो निष्ठातस्य नः स्यादस्पर्शेऽर्थे। हल्वदिति दीर्घः। शीनं घृतं। अस्प
र्शे किं। शीतं जलं। द्रवमूर्त्तिस्पर्शयोरिति किं। संस्यानो वृश्चिकः। शीतासङ्कुचित इत्यर्थः। प्रतेश्च।
प्रतिपूर्वस्य श्यः संप्रसारणं स्यान्निष्ठायां। प्रतिशीनः। विभाषाभ्यवपूर्वस्य। श्यः संप्रसारणं
वा स्यात्। अभिश्यानं घृतं। अभिशीतं। अवश्यानोऽवशीनो वृश्चिकः। व्यवस्थितविभाषेयं। तेनेह
न। समवश्यानः। अंचोनपादाने। अञ्चो निष्ठातस्य नः स्यान्नत्वपादाने। यस्य विभाषा। यस्य क्वचि
द्विभाषयेड्विहितस्ततो निष्ठाया इण्न स्यात्। उदितो वेति क्त्वायां वेट्वादिह नेट्। समक्तः। अनपादा
ने किं। उदक्तमुदकं कूपात्। नत्वस्यासिद्धत्वात् व्रश्चेति षत्वे प्राप्ते। निष्ठादेशः षत्वस्वरप्रत्यये

सि॰कौ॰उ॰कृ॰

२०१

ड्विषिषु सिद्धो वाच्यः। वृक्णः। वृक्णवान्। परिस्कंदः प्राच्यभरतेषु। पूर्वेण मूर्द्धन्ये प्राप्ते तदभावो
निपात्यते। परिस्कंदः। प्राच्येति किं। परिष्कंदः। परिस्कंदः। परेश्चेति विकल्पः। स्तन्भेरिति षत्वे प्राप्ते।
प्रतिस्तब्धः निस्तब्धो वा। अत्र षत्वं न स्यात्। दिवो विजिगीषायां। दिवो निष्ठातस्य नः स्याद् विजिगीषा
यां। द्यूनः। विजिगीषायां तु। द्यूतं। निर्वाणो वाते। अवाते इति छेदः। निर्पूर्वाद् वाते र्निष्ठातस्य नत्वं स्या
द्धा तश्चेत्कर्त्ता न। निर्वाणोऽग्निर्मुनिर्वा। वातेः। तु। निर्वातो वातः। शुषः कः। निष्ठातद्रत्येव। शुष्कः। प
चो वः। पक्वः। क्षायो मः। क्षामः। स्त्यः प्रपूर्वस्य। प्रास्त्यस्य संप्रसारणं स्यान्निष्ठायां। प्रस्त्योऽन्यतरस्यां। राम
निष्ठातस्य मो वा स्यात्। प्रस्तीमः। प्रस्तीतः। प्रात्किं। स्त्यानः। अनुपसर्गात्फुल्लक्षीवकृशोल्लाघाः।

२६

ञिफला। फुल्लः। निष्ठातस्य लत्वं निपात्यते। क्तवत्वेकदेशस्यापीदं निपातनमिष्यते। फुल्लवान्।
क्षीबादिषु क्तप्रत्ययस्यैव तलोपः। तस्यासिद्धत्वात्प्राप्तस्येटोऽभावश्च निपात्यते। क्षीबो मत्तः।
कृशस्तनुः। उल्लाघो नीरोगः। अनुपसर्गात्किं। आदितश्च। आकारेतो निष्ठाया इण्न स्यात्। ति
च। चरफलोरत उत्स्यात्तादौ किति। प्रफुल्लः। प्रक्षीबितः। प्रकृशितः। प्रोल्लाघितः। कथं तर्हि उ
प्रद्रुमं सानुमतः प्रफुल्लमिति। फुल्ल विकसने। पचाद्यच्। संज्ञं तु फुल्लतादिनिवृत्त्यर्थं। उत्फुल्लसं
फुल्लयोरुपसंख्यानं। नुदविदोन्दत्राघ्राह्रीभ्योऽन्यतरस्यां। एभ्यो निष्ठातस्य नो वा। नुन्नः। नुत्तः। विद वि
चारणे। रौध्यादिक एव गृह्यते। उन्दिना परेण साहचर्यात्। वित्तः। विन्नः। वेत्तेस्तु विदितः। विद्यतेर्विन्नः। उन्दी।

श्वीदितो निष्ठायां। स्वयते रीदितश्च निष्ठायामिट्न। उन्नः। उत्तः। त्राणः। त्रातः। घ्राणः। घ्रातः। ह्रीणः। ह्री
तः। नध्याख्यापृमूर्छिमदाम्। एभ्यो निष्ठातस्य नत्वं न। ध्यातः ख्यातः पूर्तः राल्लोपः। मूर्त्तः। मत्तः।
वित्तो भोगप्रत्यययोः। विन्दतेर्निष्ठान्तस्य निपातोऽयं भोग्ये प्रतीते वार्थे। वित्तं धनं। वित्तः पुरुषः।
अनयोः किम्। वित्तः विभाषा गमहतेति क्वसौ वेद्रादिहने टू। भित्तं शकलं। भिन्नमन्यत्। ऋण
माधमर्ण्ये। ऋधातोः क्ते तकारस्य नत्वं निपात्यते अधमर्णव्यवहारे। ऋतमन्यत्। स्फायः स्फी
निष्ठायां। स्फीतः। इण्निष्ठायां। निरः कुषो निष्ठाया इट् स्यात्। यस्य विभाषेति निषेधे प्राप्ते पु राम
नर्विधिः। निष्कुषितः। वसतिक्षुधोरिट्। आभ्यां क्त्वानिष्ठयोर्नित्यमिट् स्यात्। उषितः। क्षु २७

यितः। अञ्चेः पूजायां। पूजार्थादञ्चेः क्तानिष्ठयोरिट् स्यात्। अञ्चितः गतौ तु अक्तः। लुभो विमोह
ने। विमोहनमाकुलीकरणं। लुभः क्तानिष्ठयोरिट् स्यात् न तु गार्ध्ये। लुभितः। गार्ध्ये तु लुब्धः। क्लि
शः क्त्वानिष्ठयोः। इड् वा स्यात्। क्लिश उपतापे। नित्यं प्राप्ते। क्लिशू विबाधने। अस्य क्त्वायां विकल्पे
सिद्धेपि निष्ठायां निषेधे प्राप्ते विकल्पः। क्लिशितः। क्लिष्टः। पूङः क्त्वा पूङः क्तानिष्ठयोरिड् वा स्यात्।
पूङः क्त्वा पूङः क्तानिष्ठा वसेट् किन्न स्यात्। पवितः। पूतः। क्त्वाग्रहणमुत्तरार्थं। नोपध्यादित्य
त्र हित्त्वैव संबध्यते। निष्ठा शीङ् स्विदिमिदिक्ष्विदिधृषः। एभ्यः सेण्निष्ठा किन्न स्यात्। शयितः। श
यितवान्। अनुबंधनिर्देशो यङ्लुङ्निवृत्त्यर्थः। स्वेदितः। स्वेदितवान्। आदिकर्मणि निष्ठा व

क्त्वा। आदिकर्मणि क्तः कर्त्तरि च। आदिकर्मणि यः क्तः स कर्त्तरि स्यात्। वा॰। भावकर्मणोः। विभाषा भावादिकर्मणोः। भावे आदिकर्मणि च आदितो निष्ठाया इड् वा स्यात्। प्रस्वेदितश्चैत्रः। प्रस्वेदितं तेन। ञिष्विदेति ञ्यादि इत्यस्य ञीतः। साहचर्यात्। स्विद्यते स्तु स्विदितः इत्येव। ञिमिदा ञिक्ष्विदा दि वादी ञ्यादी च। प्रमेदितः। प्रमेदितवान्। प्रक्ष्वेदितः। प्रक्ष्वेदितवान्। प्रधर्षितः। प्रधर्षितवान्। प्रधर्षितं तेन। सेट् किं। प्रस्विन्नः। स्विन्नं तेनेत्यादि। मृषस्तितिक्षायाम्। सेण्निष्ठा किन्न स्यात्। मर्षितो मर्षितवान्। क्षमायां किं। अपमृषितं वाक्यं। अविस्पष्टमित्यर्थः। उदुपधाद्भावादिकर्मणोरन्यतरस्याम्। उदुपधात्परा भावादिकर्मणोः सेट् निष्ठा वा किन्न स्यात्। द्युतितं। द्योतितं।

मुदितं। मोदितं साधुना। प्रद्युतितः। प्रद्योतितः। प्रमुदितः। प्रमोदितः साधुः। उदुपधात्किं। विदितं। भावेत्या
दि किं। रुचितं कार्षापणं। सेट्किं। कुष्टं। शब्विकरणेभ्य एवेष्यते। नेह। गुध्यते गुधितं। निष्ठायां सेटि। णे
र्लोपः स्यात्। भावितो भावितवान्। भ्वादित इति नेट्। संप्रसारणं। ऊनः। दीप्तः। गुह्य। गूढः। वनुतनु। वतः।
ततः। पतेः। सनिवेट्। कत्वादिऊभावे प्राप्ते। द्वितीया श्रितेति सूत्रे निपातनादिट्। पतितः। सेसिवी निवेट्
क्त्वा सिद्धे वृंतत्यादीनामादित्वेनानित्यत्वज्ञापनाद्वा। तेन। भावितमिभराज्ञजियेत्यादि। यस्य विभाषे
त्यत्र एकाचइत्येव। दरिद्रितः। क्षुब्धस्वांतध्वांतलग्नम्लिष्टविरिब्धफांटबाढानि मंथमनस्तमः सक्तावि
स्पष्टस्वरानायासभृशेषु। क्षुब्धादीन्यष्टौ अनिट्कानि निपात्यंते समुदाये न मंथादिषु वाच्येषु। ह

सि०कौ०उ०कृ०

२०४

वद्द्रव्यसंपृक्ताः सक्तवो मंथः। मंथनदंडस्त्वाक्षुब्धः। मंथश्चेत्। स्वांतं मनः। ध्वांतं तमः। लग्नं सक्तः। निष्ठान
त्वमपि निपातनात्। म्लिष्टमविस्पष्टं। विरिब्धः स्वरः। म्लेच्छरेभृ अनयो रूपप्यायाद्रूत्वमपि निपा
त्यते। फांटं। अनायाससाध्यः कषायविशेषः। माधवस्तु नवनीतभावात्प्रागवस्थोपपन्नं द्रव्यं फांट
मिति वेदभाष्ये प्राह। बाढं भृशं। अन्यत्र तु। क्षुभितं। क्षुब्धो राजेति तु आगमशास्त्रस्यानित्यत्वात्। स्वनि
तं। ध्वनितं। लग्जितं। म्लेच्छितं। विरेभितं। फणितं। वाहितं। धृषिशसी वैयात्ये। एतौ निष्ठायां अवि
नये एवानिटौ स्तः। धृष्टो विशस्तः। अन्यत्र धर्षितः। विशसितः। भावादिकर्मणोस्तु वैयात्येऽपि धृषि
र्नास्ति। अत एव नियमार्थमिदं सूत्रमिति वृत्तिः। धृषेरादित्वे फलं चिंत्यमिति हरदत्तः। माधव

राम

२९

स्तु भावादिकर्मणोः रवैयात्ये विकल्पमाह। धृष्टं। धर्षितं। प्रधृष्टः। प्रधर्षितः। दृढः स्थूलबल
योः। स्थूले बलवति च निपात्यते। दृह दृहि वृद्धौ। क्तस्य इड्भावः। तस्य ढत्वं। हस्य लोपः। इडिति नलो
पश्च। दृहितो दृंहितो ऽन्यः। प्रभौ परिवृढः। वृह वृहि वृद्धौ। निपातनं प्राग्वत्। परिवृहितः। परिवृं
हितो ऽन्यः। कृच्छ्रगहनयोः कषः। कषो निष्ठाया इड्न स्यात् एतयोरर्थयोः। कष्टं दुःखं तत्कारणं वा
स्यात्। कष्टं कृच्छ्रमाभीलं। कष्टो मोहः। कष्टं शास्त्रं। दुरवगाहमित्यर्थः। कषितमन्यत्। घुषिरविश
ब्दने। घुषिर्निष्ठायामनिट् स्यात्। घुष्टा रज्जुः। अविशब्दने किं। घुषितं वाक्यं। शब्देन प्रकटीकृता
भिप्रायमित्यर्थः। अर्देः संनिविभ्यः। एतत्पूर्वादर्देर्निष्ठाया इड्न स्यात्। समर्णः। न्यर्णः। व्यर्णः। अ

सि॰कौ॰उ॰कृ॰

२०५

र्दितोन्यः। अभेश्चाविदूर्ये। अभ्यर्णं। नातिदूरं। आसन्नं वा। अभ्यर्दितमन्यत्। णेरध्ययने वृत्तं। ण्यं

ताद्वृतेः क्तस्येडभावो णिलुक् च अधीयमानेर्थे। वृत्तं छंदश्छात्रेण। संपादितं। अधीतमितियावत्।

अन्यत्र तु वर्त्तितारज्जुः। श्रृतं पाके। श्रातिश्रपत्योः क्ते श्रृभावो निपात्यते क्षीरहविषोः पाके। श्रृ

तं क्षीरं। स्वयमेव विक्लिन्नं पक्वं वेत्यर्थः। क्षीरहविर्भ्यामन्यत्तु श्राणं। श्रपितं वा। वा दांतशांतपू

र्णदस्तस्पष्टछन्नज्ञप्ताः। एते णिचि निष्ठांता वा निपात्यंते। पक्षे दमितः। शमितः। पूरितः। दासितः।

स्पाशितः। छादितः। ज्ञपितः। रुष्यमत्वरसंघुषास्वनाम्। एभ्यो निष्ठाया इड्वा। रुष्टः। रुषितः। आ

तः। अमितः। तूर्णः। त्वरितः। अस्यादित्वेकजंमंदा। संघुष्टः। संघुषितः। आस्वनितः। आस्वांतः। हृषेर्लो

भुजधातावपियस्य विभाषेति निषेधात् ... इत्येव। न पक्षे शस्तहोद्दांत इति लक्ष्यं॥

राम ३०

मस्तु। हृषेर्निष्ठायामिड्वा स्यात् लोमसु विषये। हृष्टं। हृषितं लोम। विस्मितं प्रतिघातयोश्च। हृष्टो हृषि
तो मैत्रः। विस्मितः। प्रतिहतो वेत्यर्थः। अन्यत्र तु हृष्टः। अजीके उदित्वान्निष्ठायान्नेट्। हृष तुष्टो हृष्ट्।
अपचितश्च। चायतेर्निपातोयं वा। अपचितः। अपचायितः। प्यायः पीः। वा स्यान्निष्ठायां। व्यवस्थित
विभाषेयं। तेन स्वाङ्गे नित्यं। पीनं मुखं। अन्यत्र प्यानः। पीनः स्वेदः। सोपसर्गस्य न। प्रप्यानः। आ
ङ्पूर्वस्यान्धूधसोः स्यादेव। आपीनोंधुः। आपीनमूधः। ह्लादो निष्ठायां। ह्रस्वः स्यात्। प्रह्लन्नः।
द्यतिस्यतिमास्थामित्ति किति। एषामिकारोन्तादेशः स्यात्तादौ किति। ईत्वदज्ञावयोरपवादः। दितः।
सितः। मामाङ्मेङ् मितः। स्थितः। शोछोरन्यतरेन्तेस्यां। शितः। शातः। छितः। छातः। व्यवस्थितविभा

षात्वात्व्रतविषये श्यतेर्नित्यं। संशितं व्रतं। सम्यक्संपादितमित्यर्थः। संशितो ब्राह्मणः। व्रत
विषयकेय ञ्चवानित्यर्थः। दधातेर्हिः। तादौ किति। अभिहितं। निहितं। दो दद्घोः। घुसंज्ञकस्य दा इत्य
स्य दथ् स्यात्तादौ किति। चर्त्वं। दत्तः। घोः किं। दातः। तांतो वायमादेशः। न चैवं विदत्तमित्यादावुप
सर्गस्य दस्तीति दीर्घापत्तिः। तकारादौ तद्विधानात्। दांतो वा। धांतो वा। न च दांतत्वे निष्ठानत्वं
धांतत्वे झषस्तथोरिति धत्वं शंक्यं। सन्निपातपरिभाषाया विरोधात्। अच उपसर्गात्तः। अ
जंतादुपसर्गात्परस्य दा इत्यस्य घोः अचस्तः स्यात्तादौ किति। चर्त्वं। प्रत्तः। प्रत्तः। अवत्तः। अव
दत्तं विदत्तं च प्रदत्तं चादिकर्मणि। सुदत्तमनुदत्तं च निदत्तमिति चेष्यते। चशब्दाद्यथाप्राप्तं द

स्ति। इगंतोपसर्गस्य दीर्घः स्याद्धदेशो यस्तकारः तदादावुत्तरपदे। स्वरि चेति वर्त्तमानया स्ति
द्धं। नीतं। सत्तं। सुमास्त्वतीत्तं। ध्येट्। ध्यीतं। गीतं। पीतं। जनसनेत्यात्वं। जातं। सातं। खातं। अदोज
ग्धिर्ल्यप्ति किति। ल्यप् चिति। तुग्ग सप्तमीकं। अदोजग्धिः स्याल्ल्यपि तादौ किति वा। इकारङ् ज्वारएण
र्घः। घत्वं। ऊरोऊरि। जग्धः। आदिकर्मणि क्तः कर्त्तरि च। प्रकृतः कटं सः। प्रकृतकटस्तेन। निष्ठायाम
ण्यदर्थ इति दीर्घः। क्षीयो दीर्घादिति नत्वं। प्रक्षीणः सः। वाक्रोशदैन्ययोः। क्षियो निष्ठायां दीर्घो वा
स्यादाक्रोशे दैन्ये च। क्षीणायुर्भव क्षितायुर्वा। क्षीणोयं तपस्वी क्षितो वा। निनदीभ्यां स्नातेः कौ
शले। आभ्यां स्नातेः सस्य षः स्यात् कौशले गम्ये। निष्णातः शास्त्रेषु। नदीष्णः। सुपीति कः। सत्तं प्र

निस्नातं। व्रतेः स्नातेः षत्वं। प्रतिस्नातं सूत्रं। शुद्धमित्यर्थः। अन्यत्र प्रतिस्नातं।
कपिष्ठलो गोत्रे। कपिष्ठलो नाम यस्य कापिष्ठलिः पुत्रः। गोत्रे किं। कपीनां स्थलं
कपिस्थलं। विकुशमिपरिभ्यः स्थलं। एभ्यः स्थलस्य सस्य षः। विष्ठलं। कुष्ठलं।
शमिष्ठलं। परिष्ठलं। गत्यर्थाकर्मकश्लिषशीङ्स्थासवसजनरुहजीर्यतिभ्यश्च।
एभ्यः कर्तरि क्तः स्याद्भावकर्मणोश्च। गंगां गतः। गंगां प्राप्तः। ग्लानः सः। लक्ष्मी
माश्लिष्टो हरिः। शेषमधिशयितः। वैकुंठमधिष्ठितः। शिवमुपासितः। हरिदि
नमुपोषितः। राममनुजातः। गरुडमारूढः। विश्वमनुजीर्णः। पक्षे प्राप्ता

गंगातेनेत्यादि। क्तोऽधिकरणे च ध्रौव्यगतिप्रत्यवसानार्थेभ्यः। एभ्योऽधिक
रणे क्तः स्यात् चाद्यथाप्राप्तं। ध्रौव्यं स्थैर्यं। मुकुंदस्यासितमिदमिदं यातं रमाप
तेः। भुक्तमेतदनंतस्येत्यत्र नु गोप्योदिदक्षवः॥१॥ पक्षे। आसेरकर्मकत्वात्कर्तरि
भावे वा। आसितो मुकुंदः। आसितं तेन। गत्यर्थेभ्यः कर्तरि कर्मणि च। रमापतिरि
दं यातः। तेनेदं यातं। भुजेः कर्मणि। अन्नं तेनेदं भुक्तं। कथं भुक्ताः ब्राह्मणा इति भु
क्तमस्त्येषामिति मत्वर्थीयोऽच्। वर्तमाने इत्यधिकृत्य। भीतः क्तः। ञिक्ष्विदा। क्ष्वि
ण्णः। ञिइंधी। इद्धः। मतिबुद्धिपूजार्थेभ्यश्च। मरितिहेच्छा। बुद्धेः पृथगुपादानात्।

राज्ञां मतः। इष्टः तैरिष्यमाण इत्यर्थः। बुद्धः। विदितः। पूजितः। अर्चितः। चकारोऽप
नुक्तसमुच्चयार्थः। शीलितो रक्षितः। क्षांतः। आक्रुष्टो जुष्ट इत्यादि। नपुंसके भावे क्तः।
क्लीबत्वविशिष्टे भावे कालसामान्ये क्तः स्यात्। जल्पितं। शयितं। हसितं। सुयजोर्ङ्व
निप्। सुनोतेर्यजेश्च ङ्वनिप् स्याद्भूते। सुत्वा। सुत्वानौ। यज्वा। यज्वानौ। जीर्यतेरतृन्।
भूत इत्येव। जरन्। जरंतौ। जरंतः। वासरूपन्यायेन निष्ठापि। जीर्णः। जीर्णवान्। छं
दसि लिट्। लिटः कानज्वा। क्वसुश्च। इह भूतसामान्ये छंदसि लिट्। तस्य विधीय
मानौ क्वसुकानचावपि छांदसाविति त्रिमुनिमतं। कवयस्तु बहुलं प्रयुंजते। तं तस्थि

वांसं नगरोपकंठे श्रेयांसि सर्वाण्यधिग्मुजषस्त इत्यादि। वस्वेकाजाद्घसां। कृतद्वि
त्वानामेकाचामादंतानांघसेश्च वसोरिट् नान्येषां। आदिवान्। आरिवान्। ददिवान्।
जक्षिवान्। एषांकिं। बभूवान्। भाषायां सदवसश्रुवः। सदादिभ्यो भूतसामान्ये भाषा
यांलिड्वा स्यात्तस्यच नित्यं क्वसुः। निषेदुषीमासनबंधधीरः। अध्यूषुषस्तामभव
ज्जनस्याशुश्रुवान्। उपेयिवाननाश्वाननूचानश्च। एतेनिपात्यंते। उपपूर्वादिणो भा
षायामपिभूतमात्रे लिड्वा। तस्यनित्यं क्वसुः। इट्। उपेयिवान्। उपेयुषः स्वामपि मू
र्तिमग्र्यां। उपेयुषी। उपेत्य विवक्षितं। ईयिवान्। समीयिवान्। नञ्पूर्वादश्नातेः क्वसु

दिड्भावस्याध्यतज्ञयध्यतेरनास्तुष इति भारविः। अनु पूर्वाद्वचेः कर्त्तरि कानच्।
देवस्यानुवचनं कृतवाननूचानः। विभाषा गमहनविदविशां। एभ्यो वसो रिड्वा। ज
ग्मिवान्। जगन्वान्। जघ्निवान्। जघन्वान्। विविदिवान्। विविद्वान्। विविशिवान्। वि
विश्वान्। विशिसाना सा ह वर्याद्धिं दृतेर्ग्रहणं। वेत्तेस्तु विविद्वान्। दृशेः स्वा ददृशिवा
न्। ददृश्वान्। लटः शतृशानचावप्रथमा समानाधिकरणे। अप्रथमांतेन सामाना
धिकरण्ये सतीत्यर्थः। शबादि पचंतं चैत्रं पश्य। आने मुक्। अंगस्यातो मुगागमः स्या
दाने परे। पचमानं चैत्रं पश्य। लड् इत्यनुवर्त्तमाने पुनर्लड्ग्रहणं अधिकविधाना

र्थं। तेन प्रथमासामानाधिकरण्येऽपि क्वचित्। सन् ब्राह्मणः। माङ्याक्रोशे इति वाच्यं। मा जीवन्।
मा ङि। लुङि। ति प्राप्ते लृतद्धर्ववनसामर्थ्यात्। संबोधने च। हे पचन्। हे पचमान। लक्षण
हेत्वोः क्रियायाः। क्रियायाः परिचायके हेतौ चार्थे वर्त्तमानाद्धातोर्लटः शतृशानचौ स्तः। श
यानाभुंजते यवनाः। अर्जयन् वसति। हरिं पश्यन्मुच्यते। हेतुः फलं कारणं वा। लृत्यवः। प्र
पीयमाणः सोमः। ईदासः। आसः परस्यानस्य ई स्यात्। आदेः परस्य। आसीनः। विदेः श
तुर्वसुः। वेत्तेः परस्य शतुर्वसुरादेशो वा स्यात्। विदन्। विद्वान्। विदुषी। तौ सत्। तौ शतृशान
चौ सत्संज्ञौ स्तः। लृटः सद्वा। व्यवस्थितविभाषेयं। तेनाप्रथमासामानाधिकरण्ये प्रत्य

सि॰ कौ॰ उ॰ पू॰

२१०

योत्तरपदयोः संबोध्यने ऽलक्षणे हेत्वोश्च नित्यं। करिष्यंतं करिष्यमाणं वा पश्य। करिष्यतो
पत्यं कारिष्यतः। करिष्यद्भक्तिः। हे करिष्यन्। अर्जयिष्यन्वसति। प्रथमासमानाधिकर
णे क्वचित्। करिष्यति। करिष्यन्। पङ्यजोः शानन्। वर्त्तमाने। पवमानः। यजमानः।
ताच्छील्यवयोवचनशक्तिषु चानश्। एषु द्योत्येषु कर्त्तरि चानश्। भोगं भुंजानः। कवचं
बिभ्राणः। शत्रून्निघ्नानः। इङ्धार्योः शत्रकृच्छ्रिणि। आभ्यां शतृ स्यादकृच्छ्रिणि कर्त्त
रि। अधीयन्। धारयन्। अकृच्छ्रिणि किं। कृच्छ्रेणाधीते धारयति। द्विषोमित्रे। द्विषन्श
त्रुः। सुञो यज्ञसंयोगे। सर्वे सुन्वंतः। सर्वे यजमानाः सत्रिणः। अर्हः प्रशंसायां। अर्हन्। राम

३५

ः आ क्वेस्तच्छीलतद्धर्मतत्साधुकारिषु ॥ क्विपमभिव्याप्य वक्ष्यमाणाः प्रत्ययास्तच्छीलादिषु क
र्तृषु बोध्याः ॥ तृन् ॥ कर्त्ता कटान् ॥ अलंकृञ्निराकृञ्प्रजनोत्पचोत्पतोन्मदरुच्यपत्र
पवृतुवृधुसहचर इष्णुच् ॥ अलंकरिष्णुः ॥ इत्यादि ॥ णेश्छन्दसि ॥ वीरुधः पारयिष्णवः ॥ भु
वश्च ॥ छन्दसीत्येव ॥ भविष्णुः ॥ कथं तर्हि जगत्प्रभोरप्रभविष्णु वैष्णवमिति ॥ निरंकुशाः कव
यः ॥ चकारोनुक्तसमुच्चयार्थः ॥ भ्राजिष्णुरिति वृत्तिः ॥ एवं क्षयिष्णुः ॥ नैतद्भाष्ये दृष्टं ॥ ग्लाजिस्थ
श्च ग्स्नुः ॥ छन्दसीति निवृत्तं ॥ गिदयं न तु कित् ॥ तेन स्थ ईत्वं न ॥ ग्लास्नुः ॥ गित्वान्न गुणः ॥ जि
ष्णुः ॥ स्थास्नुः ॥ वाङ्कुवः ॥ श्र्युकः कितीत्यत्र गकारप्रश्लेषान्नेट् ॥ भूष्णुः ॥ दंशेश्छन्दस्युपसंख्या

नो। दंष्ट्राऽवः पश्वावः। त्रसिगृधिधृषिक्षिपेः क्नुः। त्रस्नुः। गृध्नुः। धृष्णुः। क्षिप्नुः। शमित्य
ष्टाभ्यो घिनुण्। उकार उच्चारणार्थः। इति काशिका। अनुबन्ध इति भाष्यं। तेन शमिनि
तरा शमिनीतरेत्यत्र उगितश्चेति ह्रस्वविकल्पः। न चैवं शमी शमिनावित्यादौ नुम्प्रसंगः।
झलन्तग्रहणमपकृष्य झलन्तानामेव तद्विधानात्। नोदात्तोपदेशस्येति वृद्धिनिषेधः।
शमी तमी दमी श्रमी भ्रमी क्षमी क्लमी प्रमादी। उत्पूर्वान्मदेः अलंकृञ्मादिसूत्रेणेष्णु
जुक्तो वासरूपविधिना घिनुणपि। उन्मादी। ताच्छीलिकेषु वासरूपविधिर्नास्तीति
तु प्रायिकं। संपृचानुरुधाङ्यमाङ्यसपरिसृसंसृजपरिदेविसंज्वरपरिक्षिप

परिरटपरिवदपरिदहपरिमुहदुषद्विषद्रुहदुहयुजाक्रीडविविचत्यजरजभ
जातिचरापचरामुषाभ्याहनश्च ॥ घिनुण् स्यात् ॥ संपर्क्की ॥ अनुरोधी ॥ आयामी ॥ आ
यासी ॥ परिसारी ॥ संसर्गी ॥ परिदेवी ॥ संज्वारी ॥ परिक्षेपी ॥ परिराटी ॥ परिवादी ॥ परिदा
ही ॥ परिमोही ॥ दोषी ॥ द्वेषी ॥ द्रोही ॥ दोही ॥ योगी ॥ आक्रीडी ॥ विवेकी ॥ त्यागी ॥ रागी ॥ भागी ॥ अति
चारी ॥ अपचारी ॥ आमोषी ॥ अभ्याघाती ॥ वौ कषलसकत्थस्रंभः ॥ विकाषी ॥ विलासी ॥ वि
कत्थी ॥ विस्रंभी ॥ अपे च लषः ॥ चाद्वौ ॥ अपलषः ॥ विलाषी ॥ प्रे लपसृद्रुमथवदवसः ॥ प्रला
पी ॥ प्रसारी ॥ प्रद्रावी ॥ प्रवादी ॥ प्रवासी ॥ निंदहिंसक्लिशखादविनाशपरिक्षिपपरिरटप

१ प्रमाथी ।

सिं०कौ०उ०वृ०
२१२

रिवादिभ्याणो भो स्तयोवुञ्।पंच म्यर्थे प्रथमा।एभ्यो वुञ्स्यात्।निंदकः।हिंसकः।
इत्यादि।एवुञासिद्धे वुञ्वचनं ज्ञापकं।तद्धीनादिषु वासरूप न्यायेन तृजादयो नेति।
देविकुशोश्चोपसर्गे।आदेवकः।आक्रोशकः।उपसर्गे किं।देवयिता।क्रोष्टा।चलनश
ब्दार्थादकर्मकाद्युच्।चलनार्थाच्छब्दार्थाच्च युच्स्यात्।चेवनः।चोपनः।कंपनः।शब्दनः।
रवणः।अकर्मकात्किं।पठिता विद्यां।अनुदात्तेतश्च हलादेः।अकर्मकाद्युच्स्यात्।वर्त
नः।वर्द्धनः।अनुदात्तेतः किं।भविता।हलादेः किं।एधिता।अकर्मकात्किं।वसिता वस्त्रं।
जुचंक्रम्यदंद्रम्यसृगृधिज्वलशुचलषपतपदः।जुइति सौत्रो धातुः।गतौ वेगे च।

राम
३१

जवनः। चंक्रमणः। दंद्रमणः। सरणः। पूर्वेणसिद्धे यदि ग्रहणं लषपतपदेस्युक आबाधामा
भृदिति तेन ताच्छीलिकेषु परस्परं वा सरूपविधिर्नास्तीति। तेनः अलंकृ अलङ्कर्त्ता। क्रु
धमंडार्थेभ्यश्च। क्रोधनः। रोषणः। मंडनः। भूषणः। नयः। यकारांतात् युच् नस्यात्। क्नू
यिता। क्ष्मायिता। सूददीपदीक्षश्च। यश्च। सूदिता। दीपिता। दीक्षिता। नमिकंपीति रेण यु
चो बाधे सिद्धे दीपग्रहणं ज्ञापयति ताच्छीलिकेषु वासरूपविधिर्नास्तीति अपि कं इति
तेन कम्रा। कमना। युवतिः। कम्राकम्य नाशास्वा। यदि सृदेर्युच्। कंपं मधु सूदनः। न
पादिः। लषपतपदस्थाभूवृषहनकमगमशॄभ्य उकञ्। लाषुकः। पातुकः। इत्यादि। ज

ल्पभिक्षकुट्टलुंटवृङः षाकन् । जल्पाकः । भिक्षाकः । कुट्टाकः । लुंटाकः । वराकः । वराकी ।
प्रजोरिनिः । प्रजवी । प्रजविनौ । प्रजविनः । जिदृक्षिविश्रीण्वमाव्यथाभ्यमपरिभूप्रसूभ्य
श्च । जयी । दरी । क्षयी । विश्रयी । अत्ययी । वमी । अव्यथी । अभ्यमी । परिभवी । प्रसवी । स्पृहि
गृहिपतिदयिनिद्रातंद्राश्रद्धाभ्य आलुच् । आप्यास्मायस्पुरावावदंताः । स्पृहयालुः । गृह
यालुः । पतयालुः । दयालुः । निद्रालुः । तत्पूर्वो द्रातेर्दो नांतत्वं निपात्यते । तंद्रालुः । शीङो वाच्यः
शयालुः । दाध्येट्सिशदसदो रुः । दारुः । धारुः । सेरुः । शद्रुः । सद्रुः । सृघस्यदः क्मरच् । सृ
मरः । घस्मरः । अद्मरः । भंजभासमिदो घुरच् । भंगुरः । भासुरः । मेदुरः । विदिभिदिच्छिदेः

कुरच्॥ विदुरः। भिदुरः। छिदुरः। इण्नशजिसर्त्तिभ्यः क्वरप्॥ इत्वरः। इत्वरी। नश्वरः। जित्वरः।
सृत्वरः। गत्वरश्च॥ गमेरनुनासिकलोपो निपात्यते। गत्वरी। जागुरूकः॥ जागर्त्तेरूकः
स्यात्। जागरूकः। यजजपदशां यङः॥ एभ्यो यङंतेभ्य ऊकः स्यात्। दशमिति भाविना न
लोपेन निर्देशः। यायजूकः। जंजपूकः। दंदशूकः। नमिकम्पिस्म्यजसकमहिंसदीपो रः॥
नम्रः। कंप्रः। स्मेरः। जसिर्नञ्पूर्वः क्रियासातत्ये वर्त्तते। अजस्रं। सततमित्यर्थः। कम्रः।
हिंस्रः। दीप्रः। सनाशंसभिक्ष उः॥ चिकीर्षुः। आशंसुः। भिक्षुः। विंदुरिच्छुः॥ वेत्तेर्नुम् इषेश्छ
त्वं च निपात्यते। वेत्तितच्छीलो विंदुः। इच्छतीति इच्छुः। क्याच्छंदसि॥ देवाञ्जिगाति सुम्नयुः। आ

दृगमहनजनः किकिनौ लिड्च। आदंतादृदंताद्गमादिभ्यश्च किकिनौ स्तस्तौ दसितौ च
लिड्वत्। बभ्रिर्वज्रं पपिः सोमं ददिर्गाः। जग्मिर्युवा। जघ्निर्वृत्रममित्रियं। जज्ञिः। भाषा
यां धाञ्कृसृगमिजनिनमिभ्यः। दधिः। चक्रिः। सस्रिः। जग्मिः। जज्ञिः। नेमिः। सासहि
वावहिचाचलिपापतीनामुपसंख्यानं। यङः तेभ्यः सहादिभ्यः किकिनौ पतेर्नीगभा
वश्च निपात्यते। स्वपितृषोर्नजिङ्। स्वप्नक्। तृष्णक्। तृष्णजौ। तृष्णजः। धृषेश्चेति वा
च्यमिति काशिकादौ। धृष्णक्। शॄवंद्योरारुः। शरारुः। वंदारुः। भियः क्रुक्लुकनौ। भीरुः।
भीलुकः। क्रुकन्नपि वाच्यः। भीरुकः। स्थेशभासपिसकसो वरच्। स्थावरः। ईश्वरः। भा

स्वरः। पेस्वरः। कस्वरः। यश्च यङः। यातेर्यङन्ताद्वरच् स्यात्। अतो लोपः। तस्य यलोपं प्र
ति स्थानिवत्त्वनिषेधात् लोपो व्योर्वलीति यलोपः। अल्लोपस्य स्थानिवत्त्वमाश्रित्यातो लोपे
प्राप्ते वरे लुप्तं न स्थानिवत्। यायावरः। भ्राज भास धुर्विद्युतोर्जिपॄजुग्रावस्तुवः क्विप्। वि
भ्राट्। भाः। भासौ। धूः। धुरौ। विद्युत्। ऊर्क्। पूः। पुरौ। दृशिग्रहणं स्यात् कर्षां जुवतेर्दीर्घः। जूः। प
जुवौ। जुवः। ग्रावस्त्ष्टु स्यधातुना समासः। ष्टुत्त्वं निपात्यते। ततः क्विप्। ग्रावस्तुत्। अन्येभ्यो
ऽपि दृश्यते। क्विप्। छित्। भित्। दृशिग्रहणं विध्यन्तरोपसंग्रहार्थं। क्वचिद्दीर्घः। क्वचिदसंप्रसा
रणं। क्वचिद्द्वे। क्वचिद्ध्रस्वः। तथा च वार्त्तिकं। क्विब्वचिप्रच्छ्यायतस्तुकटप्रुजुश्रीणां दीर्घोऽसं

प्रसारणं वा। क्विब्वचीत्यादिना उणादिसूत्रेण केषांचित् सिद्धे तच्छीलादितृना बाध्यामाभू
दिति वार्त्तिके ग्रहणं। ब्रवीति वाक्। पृच्छति प्राट्। आयतं स्तौति आयतस्तूः। कटं प्रवते क
टप्रूः। जरूरूकः। श्रयति हरिं श्रीः। द्युतिगमि जुहोतीनां द्वे च। दृशिग्रहणाद् अभ्यास संज्ञा। दि
द्युत्। जगत्। जुहोतेर्दीर्घश्च। जुहूः। दृ भये अस्याद्भ्रस्वश्च। दादर्ति। दद्रत्। ध्यायतेः संप्रसा
रणं च। धीः। भुवः संज्ञान्तरयोः। मित्रभूर्नाम कश्चित्। धनिकाधमर्णयोरन्तरे यस्तिष्ठति
विश्वासार्थं स प्रतिभूः। विप्रसंभ्यो ड्वसंज्ञायां। एभ्यो भुवो डुः स्यान्न तु संज्ञायां। विभुर्व्याप
कः। प्रभुः स्वामी। संभुर्जनिता। संज्ञायां तु। विभूर्नाम कश्चित्। मितंद्र्वादिभ्य उपसंख्यानं। राम

४०

मितं द्रवतीति मितद्रुः। शंभुः। अंतर्भावितण्यर्थोत्र भवतिः। धः कर्मणि ष्ट्रन्। धेटो धात्र
स्य कर्मण्यर्थे ष्ट्रन् स्यात्। धात्री जनन्यामलकी वसुमत्युपमातृषु। दाम्नीशसयुयुज
स्तुतुदसिसिचमिहपतदशनहः करणे। दाबादेः ष्ट्रन् स्यात्करणेर्थे। दांत्यनेन दात्रं। नेत्रं।
तितुत्रतथसिसुसरकसेषु च। एषां दशानां कृत्प्रत्ययानामिण् न स्यात्। शस्त्रं। योत्रं। यो
क्त्रं। स्तोत्रं। तोत्रं। सेत्रं। सेक्त्रं। पत्त्रं। दंष्ट्रा। नद्ध्री। हलसूकरयोः पुवः। पूङ् पूञोः करणे
ष्ट्रन् स्यात् तच्चेत्करणं हलसूकरयोरवयवः। हलस्य सूकरस्य वा पोत्रं। मुखमित्यर्थः। अर्ति
लूधूसूखनसहचर इत्रः। अरित्रं। लवित्रं। धवित्रं। सवित्रं। खनित्रं। सहित्रं। चरित्रं। पुवः

सि०कौ०उ०क०
२१५

संज्ञायां। पवित्रं। येनाज्यमुत्पूयते। यज्ञानामिकावेष्टनं। कर्त्तरिचर्षिदेवतयोः पुव
स्त्रः स्यात् ऋषौ करणे देवतायां कर्त्तरि। ऋषिर्वेदमंत्रः। तदुक्तमृषिणेति दर्शनात्। पू
यतेऽनेनेति पवित्रं। देवतायां तु अग्निः पवित्रं स मा पुनातु। अथोणादयः। कृपावाजि
मिस्वदिसाध्यशूभ्य उण्। करोतीति कारुः शिल्पी कारकश्च। आतो युक्। वातीति वायुः।
पायुर्गुदं। जयत्यभिभवति रोगान् जायुरौषधं। मिनोति प्रक्षिपति देहे ऊष्माणमिति मा
युः पित्तं। स्वादुः। साध्नोति परकार्यं साधुः। अश्नुते आशु शीघ्रं। आशुर्व्रीहिः पाटलः स्या
त्। छंदसीणः। मानश्चायो। दृसनिजनिचरिचटिभ्यो ञुण्। दार्यत इति दारुः। स्नुः प्रस्थः राम
७९

सानुरस्त्रियां। जानु। जानुनी। इह जनिवध्यो स्येति न निषेधः। अनुबंध्यद्वय सामर्थ्यात्। वा
रुरम्यं। वाद्रुप्रियं वा कं। म्लगद्धादित्वात्कुप्रत्यये वद्रु इत्यपि। किंजरयोः श्रिणः। किं श्रणा
तीति किं श्रारुः सस्य रूकं वाणः स्वाज रामेति जरा यु गर्भाशयः। चोरश्च व्नः। तरं त्यनेनव
र्णइति ताल्वुः। रुकेववः। करवा। रूके नगलेन वक्तीति रूकवा। कुर्मपृष्ठेव सरटे वरणा मु
धे इति विग्घः। मृमश्री वृ वरि सरितनि व्यनि मिमक्तिभ्यन्तः। भरतिविभर्त्ति वा भरुः। स्वा
मी हरस्व। त्रियं तेऽस्मिन्भूतानि मरुः निर्जलदेशः। शेते शयुः। अजगरः। तरुर्वृक्षः। वदंति
भक्षयंति देवता इममिति वरुः। सरुः। खड्गादिमुष्टिः। ननु स्वप्योः। स्त्रियां मर्त्ति स्तनु स्तनः।

सि॰कौ॰उ॰वृ॰

२१९

धनुः शस्त्रविशेषः। धनुषा वधनुर्विदुः। धनुरिवाजनिवक्र इति श्रीहर्षः। मयुः किंनरः।
मङ्कुः पानीयकाकिकेति रभसः। न्यङ्कुः क्रोदित्वात्कुः। जङ्क्वे नसस्यदः। अण्ण स्वा जवले शाक
ण एव ः। वाल्क टि वटिभ्यां कट्टुः। वटति वदतीति वटुः। धान्ये नित्। धान्ये वाच्ये ऽणः प्रत्य
यः स्यात्स च नित्। नित्वादाद्युदात्तः। प्रियंवे गेन्ध मेण एव स्वमे। ब्रीहिभेदस्त्वणुः पुमानुः। निग्र
हणं फलिपारी इत्यादि सूत्रमभिव्याप्य संबध्यते। शृस्वृस्निहि त्रप्यसि वसि हनि क्लिदिबं
धिमनिभ्यश्च। शृणोतीति शरुः रायुध कोपयोः। स्वरुर्वज्रं। स्नेहुर्व्याधिः। तंद्रुरित्यन्ये। त्र
पुसी सो। पुंसि त्रप्सुर्नवः प्राणः। वसुर्द्रोदे ऽग्नौ योक्त्रे शेषे वसु तोये धने मणौ। हनुर्वक्त्रै

६

आ॰श्री॰भा॰वो॰२

राम

४२

१ ङ्किघतीति

कदेशः। ऋकिंदुस्यंदः। बंधुः। मन्तुः। वात्। बिदि अवयवे। बिंदुः। स्यंदेः संप्रसारणं धश्चादेशेन द विशे
षेऽणौ सिंधुर्ना सरिति स्त्रियामित्यमरः। उंदेरिश्चादेः। उनत्ति इंदुः। ईषेः किद्व। ईषेः उः स्यात् सव
कित्। आदेरिकारादेशश्च। ईषते हिनस्तीति इषुः शरः। इषुर्द्वयोः। स्कंदेः सलोपश्च। कंदुः। सृजे
रसुम्च। वा सलोपः। उ प्रत्ययश्च। रज्जुः। कृते राघंत विपर्ययश्च। ककारतकारयोर्विनिमयः। त
र्कुः सूत्रवेष्टनं। नावंचेः। न्यङ्क्वादित्वात्कुत्वं। नियतमंचतीति न्यंकुः मृगः। फलिपाटिनमिम
निजनां गुक्पटिनाकिधतश्च। फलेर्गुक्। फल्गुः। पाटेः पटिः। पाटयतीति पटुः। नम्य
तेऽनेन नाकुः वल्मीकं। मन्यते इति मधुः। जायते इति जन्तुः। बलेर्गुक्। बलनं संवरणे। वल्गुः शः

किसन्वच्च। श्यतेरुः स्यात्सच किसन्वच्च। शिशुः बालः। यो द्वे च। ययुरश्वो श्वमेधीयः। सन्वदि-
ति प्रकृतेर्द्वेग्रहणमित्वनिवृत्त्यर्थं। कुर्भ्रश्च। बभ्रुर्मुन्यंतरे विशाले बभ्रूनकुलेपि गजो। वा-
दन्यतोपि। चक्रुः कर्त्ता। जघ्नुर्हन्ता। पपुः पालकः। पृभिदिव्यधिगृधिधृषिभ्यः। कुः स्यात्।
पुरुः। भिनत्तीति भिदुर्वज्रं। ग्रहिज्येति संप्रसारणं। विरहिणं विध्यतीति विधुः। विधुः। शशांके क-
र्दूरे हृषीकेशे च राक्षसे। गृधुः कामः। धृषुर्दक्षः। कृग्रोरुच्च। करोतीति कुरुः। गृणाति गुरुः।
ऽपदुःसुषुस्थः। सुषामादिषु चेति षत्वं। ऽपष्ठु। प्रतिकूलं। दुष्ठु। सुष्ठु। रपेरिच्चोपधायाः।
ऽनिष्टं रपतीति रिपुः। ऽर्जिदृशिकम्यमिपशिबाधामृजिपशितुक्धुक्दीर्घहकाराश्च।

ऽर्जयति गुणानर्जुः। सर्वानविशेषेण पश्यतीति पशुः। केतुः। ऽंशुः कपः। पांसुर्नीन
द्वयोरजः। ताजव्याऽपिदंत्याश्चसंवस्करपांसवः। बाधतेदति बाहुः। स्त्रीपुंसयोर्भुजः।
प्रथिम्रदिभ्रस्जां संप्रसारणं सलोपश्च। त्रयाणां कुः। संप्रसारणं भ्रस्जेः सलोपश्चाप
पृथुः। मृदुः। न्यं क्वादित्वात्कुत्वं। भृज्जतितपसा भृगुः। लंघिबंह्योर्नलोपश्च। लघुः। बालम्
ललघ्वलमङ्कुलीनां वा लोरत्वमापद्यते। रघुर्नृपभेदः। बहुः। ऊर्णोतेर्नुलोपश्च। ऊरुः
सक्थि। महति ह्रस्वश्च। उरु महत्। श्लिषेः कश्च। श्लिष्यतीति श्लिकुः। भृत्यः। उप्यतो ज्योति
श्च। आङ्परयोः खनिशृभ्यां डिच्च। आखनतीत्याखुः। परं शृणातीति परशुः। एषो

सि०कौ०उ०प्र०

२१९

३ तद्वान्द्रुमः। खरुशंकुपीयुनीलंगुलिगु। पंचैते कुप्रत्ययांता निपात्यंते।

दरादित्वादकारलोपश्च मुर्दपि। हरि मितयोर्द्रुवः। हरिभिर्द्रूयते हरिद्रुर्वृक्षः। मितंद्रव
तिमितद्रुः समुद्रः। शते वा। शतधाद्रवति शतद्रुः। बौ कुलकाल्के वलादपि। द्रवत्पदं द्वं मितिद्रुः
वृक्षः। शताद्रवा वा खनते रेफश्चांतादेशः। खरुः कामः क्रोधश्च सर्वः अश्वश्च। शङ्कुर्नाकी
लशल्ययोः। पिबतेरीत्वं युगागमश्च। पीयुर्वायसः कालः सुवर्णं वा। निपूर्वा द्गञ्जिगता
वस्मात्कुः नेदीर्घश्च। नीलंगुः क्रिमिविशेषः सृगालश्च। नीलांगुरिति पाठांतरं। तत्र
धातोरपि दीर्घः। लगे संगे अस्य अत इत्वं वा। लगतीति लिगुश्चित्तं। लिगुर्मूर्खः। मृ
गय्वादयश्च। एते कुप्रत्ययांता निपात्यंते। मृगं यातीति मृगयुः व्याधः। देवयुर्धार्मिकः

राम ४४

मित्रयुर्लोकयात्राभितः। अङ्कति गत्यर्थः। मंदिवाशिमथिचतिचंकयंकिभ्य उरच्।
मंदुरा वाजिशाला। वाशुरा रात्रिः। मथुरा। चतुरः। चंकुरो रथः। अंकुरः। स्वर्जूरादित्वाद्
कूरोपि। व्यथेः संप्रसारणं किच्च। विथुरश्चोररक्षसोः। मकुरदर्दुरौ। मकुरो दर्पणः। बा-
कुलकान्मुकुरोपि। दृ विदारणे। धातो र्द्वित्वं अभ्यासस्य रुक् टिलोपश्च। दर्दुरस्तोय-
दे भेके वाद्यभाण्डाद्रिभेदयोः। दर्दुरा चंडिकायां स्याद्ग्रामजाले च दर्दुरमिति विश्वः। मकुरा-
दयश्चोरजंतानिपात्यंते। माद्यंतेर्गुक्। मकुरो मस्य भेदः। कब वर्णे। रुमागमः। कर्बुर-
श्चित्ररक्षसोः। बभातेः स्वर्जूरादित्वाद्रूरोपि। वंधुरबंधुरौ स्यातां नम्रसुंदरयोः। स्त्रिषु

इति रंतिदेवः। कोकतेर्वा कुकु। कुक्कुरः कुकुरः। असेरुरन्। असुरः। प्रज्ञाद्यण्। आसुरः।
मसेश्चापंचमे पादे मसेरूरन्निति वक्ष्यते। मसूरा मसुरा। ब्रीहिभेदे पण्ययोषिति। म
सूर मसुरौ वद्धाविति विश्वः। शाश्वतो रान्तौ। सुंद्धतिः। आश्चर्ये। श्वसुरः। अविमह्योष्टिषच्।
अविषः। महिषः। अमेर्दीर्घश्च। आमिषं त्वस्त्रियां मांसे तथा स्याद्भोग्यवस्तुनि। रुहेर्वृ
द्धिश्च। रंकुशंवररौहिषाः। तवेर्णिद्वा। तवेति सौत्रो धातुः। तविषता विषाव श्यौ स्वर्गे वा
स्त्रियां तविषी ताविषी। नदी देवकन्या भूमिश्च। तविषीवन्नमिति वेदभाष्यं। नञि व्य
थेः। अव्यथिषो ब्धि सूर्ययोः। अव्यथिषी धरा रात्र्योः। किलेर्बुक्च। किल्बिषं। इषिमदि

मुदिखिदिछिदिभिदिमंदिवंदितिमिमिहिमुहिरुचिरुधिबंधिशुषिभ्यः किरच् । इषि
रोऽग्निः । मदिरा सुरा । मुदिरः कामुकाभ्रयोरिति विश्वमेदिन्यौ । खिदिरश्चंद्रः । छिदिरोऽ
सिकुठारयोः । भिदिरं वज्रं । मंदिरं गृहं । वंदिरो वंदिहस्तिनौ । तिमिरं तमः । अक्षिरोगश्च ।
मिहिरः सूर्यः । मुहिरः काम्यसभ्ययोः । मुचिरो दाता । रुचिरं । रुधिरं । बधिरः । शुषश्शोष
णे । शुषिरं छिद्रं । शुष्कमित्यन्ये । अशेर्णित् । आशिरो वह्निरक्षसोः । अजिरशिशिरशि
थिलस्थिरस्फिरस्थविरखदिराः । अजेर्वीभावाभावः । अजिरमंगणं । शशेरुपधाया
इत्वं । शिशिरं स्यादृतोर्भेदे तुषारे शीतलेऽन्यवत् । श्रथ मोचने उपधाया इत्वं । रेफलोपः ।

प्रत्ययरेफस्य लत्वं। शिथिलो। स्थास्फायोष्टिलोपः। स्थिरं निश्चलं। स्फिरं प्रभूतं। तिष्ठ-
तेर्वुक् ह्रस्वत्वं च। स्थविरः। खदिरः। बाहुलकात् शीङो वुक् ह्रस्वश्च। शिविरं। सलिकल्य-
निमहिभडिमडिशडिपिडितुडिकुकिभूभ्य इलच्। सलति गच्छति निम्नमिति सलिलं।
कलिलः। अनिलः। महिला। पृषोदरादित्वान्महेलापि। भडि इति सौत्रो धातुः। भडि-
लो शूरसेवकौ। मंडिलो दूतः। कल्याणं वा। शंडिलो मुनिः। पिंडिलो गणकः। तुंडिलो मु-
खरः। कोकिलः। भविलो भव्यः। बाहुलकात् कुटिलः। कमेः पश्च। कपिलः। गुपादि-
भ्यः कित्। श्वो मिथिला नगरी। पथिलः पथिकः। पतिकठिकुठिगडिगुडिदंशिभ्य एर-
गुपिलो राजा। तिजिलो निशाकरः। गुहिलं वनं। मिथिलादयश्च। मथ्यंतेत्र रिप१

रक्। पतेरः पक्षी गंता च। कठेरः कृच्छ्रजीवी। कुठेरः पर्णाशः। बाहुलकान्नुम्। गडेरो मेघः।
गुडेरो गुडकः। दशेरो हिंस्रः। कुम्बेर्नलोपश्च। कुबेरः। शादेस्तच। शातेरः। शात्रुः। मस्लेरादयः।
एरगंता निपात्यंते। मस्लेरो जरा। गुध्येरोगोस्त्रा। गुहेरो लोहघातकः। मुहेरो मूर्खः। कबे
रोतच्च पश्च। कपोतः पक्षी। भातेर्डवतुः। भातीति भवान्। कठिचकिभ्यामोरन्। कठोरः। चको
रः। किशोरादयश्च। किंपूर्वस्य शृणातेर्विलोपः किमोन्त्यलोपः। किशोरः। अश्वशावः। स
हेरः साधुः। कपिगडिगंडिकटिपटिभ्य ओलच्। कपीति निर्देशान्नलोपः। कपोलः। गडोल
गंडोलौ गुडकपर्यायौ। कटोलः कटुः। पटोलः। मीनातेरूरन्। मयूरः। स्यंदेः संप्रसारणं च।

सिंदूरं। सितनिगमिमसिसच्यविंध्याञ्कुशिभ्यस्तुन्। सिनोतीति सेतुः। तितुत्रेति ने
ट्। तंतुः। गंतुः। मस्तु दधिमंडं। सच्यत इति सक्तुः। अर्ह्वादिः। ज्वरत्वरेत्यूठ्। तत्र क्वितीत्य
नुवर्त्तत इति मतेलुबाकुलकात्। ओतुर्बिडालः। ध्यातुः। कोष्ठापः। क्विब्। पिबतीति पीतुर्वह्नौ
दिवाकरे। अर्त्तेश्च तुः। अर्त्तेः ऋतुः स्यात् सवकित्वात् ऋतुः स्त्रीपुष्पकालयोः। कमिमनिजनिगा
भायाहिभ्यश्च। एभ्यस्तुः स्यात्। कंतुः कंदर्पचित्तयोः। मंतुरपराधः। जंतुः प्राणी। गातुः पुं
स्कोकिले भृंगे गंधर्वे गायने पि वा। भातुः आदित्यः। यातुरध्वगकालयोः। रक्षसि क्लीबे।
हेतुः कारणं। वायः क्तिः। केतुर्ग्रहपताकयोः। आप्नोतेर्ह्रस्वश्च। अप्तुः शरीरं। वसेस्तुन्। वस्तु।

अगारे णिच्वावेश्म स्यर्वास्तु स्त्रियां । कन्तुः कन्तुः । कन्तुर्यज्ञः । एधिवसोश्चतुः । एधतुः पु
रुषः । वहतुरनड्वान् । जीवेरातुः । जीवातुः स्त्रियां भक्ते जीविते जीवनौषधे । आतृकन्वृद्धि
श्च । जीवेरित्येव । जैवातृकः स्त्रियं इन्दुभिषगायुष्मत्सु कृषीवले । कृषि चमि तनि धनि सर्जि
खर्जिभ्य ऊः । कर्षूः पुंसि करीषाग्नौ कर्षूर्नद्यां स्त्रियां मता । चमूः । तनूः । धनूः शस्त्रं ।
सर्जूरर्जने । सर्जूर्वणिक् । खर्जूर्व्यथने । खर्जूः पामा । मृजेर्गुणश्च । मर्जूः शुद्धिकृत् । व
हो ध च । वध्वूर्जाया स्नुषा स्त्री च । कषेश्छश्च । कच्छूः पामा । णित्कसिपद्यर्त्तेः । कासूः श
क्तिः । पादूः चरणधारणी । आरूः पिङ्गलः । अणोड्यश्च । आड्डूः जलप्लववद्व्यां नस्ति

लंबे र्नलोपश्चात्तुंब्यलाबूरुभे स्तमेद इत्यमरः। केश्च एरङ् वा स्यात् कश्चाहे उपपदे ऋणेगते
रुः स्यादेरङ् वादेशः। कशेरुस्तृणकंदे स्त्री। बाकुलकादुप्रत्यये कशेरु क्लीबे पुंसि वा।
त्रो डुडू वा तरते रुः स्यात् तस्य डुट् तडूः स्यात् रुहस्तकः। दरिद्राते र्यालोपश्च दश्चाभ्या
स्वयोतयो र्लोपः। दद्रूः कुष्ठप्रभेदः। नृतिशृध्योः कूः। नृतूः नर्तकः। शृधूरपानं। स
तेरश्च। सद् इति सौत्रो धातुः ततः कूः अभागमश्च। रत्नूर्देवनदी सत्यवाक् च। अंदृदंभ
जंबूकफेलूकर्कंधूदिधिषूः। एते कूप्रत्ययांता निपात्यंते। अंदूर्बंधनं। दभी ग्रंथे नि
पातनान्नुमः। दंभूः। अनुस्वाराभावोपि निपातनादित्येके। दम्भूः। जनेर्बुक्। जम्बूः।

जम्बदनेऽस्येत्येके। बाकुलकाद्र स्वोपि। जंबुः। कफं ज्ञातिकफेरुः। हेषमातकः। नि
पातनादेतत्। कर्कं दधातिकर्कधूः सर्वदरी। निपातनान्नुम्। दिधिं धैर्यं स्यति त्यजतीति दि
धिषूः। पुनर्भूः। केचित्तु जंबूकम्बू जंबूकं बूदतिपठंति। दंष्ट्र ज्जक्लेशो दंष्ट्रः सर्वजातिः।
कमेर्बुक्। कंबुः। परद्रव्यापहारी। मयो रुतिः। मरुत्। गरुत्मक्षः। ग्रोमुद्रा गिरते रुतिस्त
स्य वसुदू। गर्मुत्सु वर्णे तृणविशेषश्च। इषे रुत्तेरु। हर्षुलो मृगकामिनोः। बाकुलकाद्व
टतेः। वटुलः शोभनं। हृस्व रुहि युधिभ्य इतिः। हरित्क कुमिवर्णे च तृण वाजि विशेषयोः।
सरिन्नदी। रोहित् मृगविशेषस्य स्त्री। युध इति सोत्रो धातुः। सश्च स्यरो हित्। पुरु

षस्य योषित् इति भाष्यं। ताडेर्णिलुक् च। ताडयतीति तडित् विद्युत्। शमेर्ढः। बाहुलकात्
दइसंज्ञा एयादेशाद्दुना शण्ढः क्लीबः। कमेरठः। कमठः। बाहुलकाज्जरठः। रमेर्वृद्धि
श्च। रामठं हिंगु। शमेः खः। शंखः। कणेष्ठः। कण्ठः। कलस्तृपश्चात्। तपतेः कलप्रत्ययः स्या
च्चोत्वं कतेः। तपलो लता। तृफला फलत्रिके। शापेर्वश्च। शबलः। वृषादिभ्यश्चित्। वृ
षलः। पललं। लंगे वृद्धिश्च। लांगलं। कुटिकशिकौतिभ्यः प्रत्ययस्य मुट् च। कुट्मलः। कु
डेरपि। कुड्मलः। कश्मलं। बाहुलकात् कुणः। कोमलं। म्रजे बि लोपश्च। मलं। चुपेरच्चोपधा
याः। चपलं। शकिशम्योर्नित्। शकलं। शमलं। छो गुगह्रस्वश्च। छगलः। प्रज्ञादित्वाच्छा
२ बाहुलकात् कुणः। सरलः। तरलः। कमेर्बुक्। कम्बलः। मुसलस्खंडे। मुसलं।

गलः। भमंताकुः। दंडः। रंडा। खंडः। मंडः। वरण्डः। छिन्नहस्तः। अंडः। वाकुलेका सत्वाभावः। प
ण्डः संघातः। तालव्यादिरित्यपरे। शंडः। जंडः। वंडः। पंडः। क्लीबः। पंडा बुद्धिः। कादिभ्यः कित्।
कवर्गादिभ्योडः कित्स्यात्। कुण्डं। काण्डं। गुडूः गुडः। घुण भ्रमणे। घुण्डो भ्रमरः। स्था
वतिमृजेरालन्वालन्मालीयचः। तिष्ठतेरालन्। स्थालं। स्थाली। अवतेर्वालन्। वा। त्वालः।
मृजेरालीयच्। मार्जालीयो बिडालः। पतिचंडिभ्यामालन्। पातालं। चंडालः। अन्त्रादि
त्वादृणि चंडालो पोत्ये के। तमिविशिबिडिमृणिकुलिकपिपलिपंचिभ्यः कालन्। त
मालः। विशालः। बिडालः। मृणालं। कुलालः। कपालं। पलालं। पंचालाः। पतेरंगच्पक्षि

सि० कौ० उ० कृ०

२२५

णि। पतंगः। तरत्यादिभ्यश्च। तरंगः। लवंगः। विडादिभ्यः कित्। विडंगः। मृदंगः। कु
रंगः। वा कुलं कायत्वं वा। सृवृञ्भ्यो वृद्धिश्च। सारंगः। वारंगः। खड्गादिमुष्टिः। गन्गम्य
द्योः। गंगा। अद्गः पुरोडाशः। छापूखडिभ्यः कित्। छागः। पूगः। खड्गः। वा कुलं का
ल्पिष्ट्। अनादरे। गन्तव्याभावश्च। भिङ्गस्तरलेः। भिङ्गैरगघतससंभ्रममेवमेकेति
माघः। भृञः कित् नुट् च। भृङ्गोगन्धिकस्यात्तस्य नुट् च। भृङ्गाः विडालिङ्गस्यादाः। भृङ्गा
तेरिः स्व च। शृंगः। गणेशः कुनो। नुडित्यनुवर्त्तते। शार्ङ्गः। मुदिग्रोर्गग्गौ। मुद्गः। गर्गः।
अण्डन्कृसृभृवृञः। करंडः। सरंडः पक्षी। भरंडः स्वामी। वरंडो मुखरोगः। मृदृभसो

राम

५०

दिः। शारत्वाद्दरद्धृदयकूलयोः। नसञ्ज्ञपनं। दरणोतेः पुंगरूस्वस्वा। दषत्वा। त्यजितनियजि
भ्योडित्। त्यद्। तद्। यद्। सर्वादयः। एतेस्तुद्व। एतद्। सत्तैरदिः। सरद्स्याद्वातमेघयोः।
वेदभाष्येतु याभिः कशान्तुमितिमंत्रे सरद्भ्यो मधुमक्षिकाभ्य इतिव्याख्यातं। जंघेर्न
लोपश्च। जघन्यद्वायुः। पादयतेरजिः। पारकस्तु वर्णे। प्रपः। किंसंप्रसारणं वा। एषकः।
स्वरादिपाठादव्ययत्वं। भियः षुक्रस्वश्च। भिषक्। युष्यसिभ्यां मदिक्। युष्मसोत्रोध्या
तुः। युष्मद्। अस्मद्। त्वं। अहं। आर्त्तिस्तुसुऊरुध्वक्षिरस्तुभायावापदियक्षिनीभ्योमन्
न्। एभ्यश्चतुर्दशभ्यो मन्। अर्म स्वक्षररोगः। स्तोमः संघातः। सोमः। हेमः। सर्मो गमनं।

सिं०कौ० उ०कृ०
२२६

दि

धर्मः । क्षेमः । क्षेमं कुशलं । क्षौमं प्रज्ञाप्यति क्षौमं वा भामः । आदित्यः । यामः । वामः शो
भनदुष्टयोः । पद्मं । यक्षपूजायां । यक्ष्मो रोगराजः । नेमः । जहातेः सन्वद्लोपश्चाति
सः कुटिलमंदयोः । अवतेष्टिलोपश्चा मन्प्रत्ययस्याद्यंटिलोपः न प्रकृतेः । अन्यथा
ङित्येव ब्रूयात् । ज्वरत्वरेति ऊठौ । तयोर्दीर्घे कृते गुणः । वादिपाठाद्व्ययत्वमित्युज्ज्व
लदत्तः । तन्न । तेषामसत्वार्थत्वात् । वस्तुतस्तु स्वरादिपाठाद्व्ययत्वं । अवतीति ओम् ।
ग्रसेरा वा ग्रामः । अविसिविसिशुषिभ्यः कित् । ऊमं नगरं । स्यूमो रश्मिः । सिमः सर्वः ।
शुष्ममग्निसमीपयोः । इषियुधीन्धिदसिश्याधूसूभ्यो मक् । इध्मः कामवसंतयोः । इ

राम
५१

बीतिपाठे दीर्घादिः।युग्मः।शादेयोद्भवा।द्युम्नः समित्वा दस्मोयजमानः श्यामः।घ
मः।सूक्ष्मोंतरिक्षं।बाकुलकादीर्मब्रणः।युजिरूवितिजांकुस्वा।युग्मं।रुक्मं।तिग्मं।हंतेर्हि
वा।हिमं।भियः कुग्वा।भीमो भीष्मः।घर्मः।घ्यातोर्मग्गुणश्च निपात्यते।ग्रीष्मः।ग्रस
तेर्निपातोयं।ग्रथेः षिवन्नं संप्रसारणं वा।पृथिवी।षवन्नित्येके।प्रथवी पृथिवी पृथ्वी
इतिशाश्वतर्णवः।अम्भूत्रुषिजरिकणिरवहिविश्लिभ्यः कन्।अम्बः।शुषस्नेहनादेः।शुष्कः
स्याद्गलुस्वर्थयोः।शुष्काजलंकणिका।जह्नापक्षिभेदः।फलंवा।कणंपापं।बाकुलका
दित्वे क्रिएवमपि।खद्वाविस्वं।दृणशीभ्यांवन्।एवोगंता।घेवरएवा मरुतः।असत्वे निपा

तो यां। श्रोवं मित्राय वरुणाय। सर्वनिघृष्वरिष्वलष्वशिवपद्वप्रह्वेष्वा अतंत्रे। अकर्त्त
र्यैते निपात्यंते। स्तमनेन विश्वमिति सर्व। निपूर्वाद्घृषेर्गुणाभावोपि। निघृष्यतेनेन
निघृष्वः खुरः। रिष्वो हिंस्रः। लष्वो नर्तकः। लिष्व इत्यन्ये। तत्रोपध्याया इत्वमपि। शेतेऽस्मि
न् सर्वं शिवः शंभुः। शीङो ह्रस्वत्वं। पद्वो रथो भूर्लोकश्च। प्रह्वयते इति प्रह्वः। ह्वेञ आकार
वकारलोपः। जहातेराल्लोपो वा। ईषेर्वन्। ईष्वा आचार्यः। इष्व इत्यन्ये। अतंत्रे किं। सर्त्तासा
रकः। बाङ्लकाङ्क्षते ह्रस्वः। शेवयह्वजिह्वाग्रीवाऽऽप्वामीवाः। श्रेव इत्यंतोदात्तार्थीयां
त्यनेन यह्वः। ह्रस्वो कुगागमश्च। जिहं त्यनया जिह्वा। लकारस्य [illegible]जः। गुणाभावश्चाग्नि

राम
५२

रं स्यनया ग्रीवा। ईङ् गमस्य। ऽना ग्नोतीति ऽआघा वायुः। मीङ्। मीवा। उदर क्रिमिः। वायु
रित्यन्ये। कृगृशृदृभ्यो वः। कर्वः कामः। आखुश्चा गर्वः। शार्वः। दर्वो राक्षसः। कनिन्युवृ
षितक्षिराजिधन्विद्युप्रतिदिवः। यौतीति युवा। वृषा। ईङ्। तक्षा। राजा। धन्वा मरुः।
४ श्रा धन्वं रासनं। द्युवा सूर्यः। प्रतिदीव्यतीत्यस्मिन्प्रतिदिवा दिवसः। सप्यंशूभ्यां तुट् च। स
प्ता। अष्टा। नञि जहातेः। ऽअहः। श्वन्नुक्षन्पूषन्प्लीहन्क्लेदन्स्नेहन्मूर्द्धन्मज्जन्नर्यमन्वि
श्वप्सन्परिज्मन्मातरिश्वन्मघवन्निति। एते त्रयोदश कनिप्रत्ययान्तानि पात्यंते। श्व
यतीति श्वा। उक्षा। पूषा। प्लिह गतौ। इकारस्य दीर्घत्वं। प्लेहयतीति प्लीहा कुक्षिव्याधिः

सि॰कौ॰उ॰कृ॰
२२८

१ भाष्ये।

क्लि दू आद्रौ। क्लिद्यतीति क्लेदवं दुः। स्नि ह्यतेर्डुणः। स्नि ह्यतीति स्नेहा सुहृद्वं दृ स्थानु स्व
त्यस्मिन्नाहते मरूर्छा। मुहे रूप ध्याया दीर्घः ध्यौं ता देशो रमागमस्थाम ज्ञत्य स्छिद्रु म
ज्ञाऽस्छि साः। अर्यपूर्वः माङ्। अर्यमा। विश्वं प्सातीति विश्वप्साग्निः। परिज्ञायते प
रिज्मा वं ड्रोऽग्निः स्था। जने रूप ध्या जो पो मस्थां ता देशः। मातरि अंतरिक्षे श्वयतीति मात
रिश्वा। ध्यातो रिकारलोपः। महत्प्र जायां। हस्वपः। अनुगागमस्थामघवा इट्रः॥ ॥
इत्युणादिषु प्रथमः पादः॥ ॥ कृहृभ्यामेणुः। करेणुः। हरेणुर्गंधद्रव्यं। हनि कु
षिनीरमिकाशिभ्यः क्थन्। हथो विषणः। कुष्ठः। नीथो नेता। रथः। काष्ठं। अवेभृत्रः।

राम
५३

=प्रवर्ग्यः । उपिकुपिगार्त्तिभ्यस्तु नः । उष्णः । कोष्णं । गाथा । =अपूपः । बाकुलकात् स्तोथः ।
सत्रैर्लित्र । साधः सम्मूहः । =रूवरूम्यासूथन् । ॐरूथं मांसं । वरूथो रथगुप्तो ना । पा
त्रतुद्विवविद्विविसिविभ्यस्तु क्त । पीथो रविर्घृतं पीथं । नीथं शास्त्रं । ध्वरक्षे त्रो पाथो
पाध्यायमंत्रिस्तु । =प्रवत्तार विंतुष्टो भः स्त्री जैरे स्तुवविस्तुतमितिविम्बः । तुच्छो ग्निः । उ
क्थं साममेदः । रिक्थं । बाकुलकाद्देवेरथि । रिक्थमृक्थं धनं वसु । सिक्थं । =अचौर्निर्दिनि
र्दिथः साम । निशीथगोपीथावगथाः । निशीथोऽर्धरात्रः रात्रिमात्रं वा । गोपीथं ती
र्थं । =अवगथः प्रातःस्नातः । गम्बोदि उद्गीथः सामभागविशेषः । समीथः । समि

सि॰कौ॰उ॰कृ॰
२२९

थः वह्निः संग्रामस्था। तिथपृष्ठगूथयूथप्रोथाः। तिजेर्जलोपः। तिथोऽनलः कामस्था।
पृष्ठं। गूथं विष्ठा। यूथं समूहः। प्रोथमस्त्री तुरंगास्ये प्रोथः। अस्थि तक्थ्यते। स्फा
यितंचिवंचिशकिक्षिपिक्षुदिसृपितृपिदृपिवंद्युंदिश्वितिवृत्यजिनीपदिमदिमु
दिखिदिछिदिभिदिमंदिचंदिदहिदसिदंभिवसिवाशिशीङ्हसिसिधिशुभिभ्यो र
क्। द्वात्रिंशतो रक्स्यात्। वलि यलोपः। स्फारं। न्यंक्वादित्वात्कुत्वं। तक्रं। वक्रं। शक्रं। क्षि
प्रं। क्षुद्रः। सृप्रश्चंद्रः। तृप्रः पुरोडाशः। दृप्रो बलवान्। वंद्रः। पूजकः। उंद्रो जलच
रः। श्वित्रं कुष्ठं। वृत्रो रिपौ घने ध्वांते शैले चक्रे च दानवे। अज्रेवीः। वीरः। नीरं। पद्रो ग्रा

राम
५४

मः। मद्रो हर्षः। देशो भेदस्यानुग्रहप्रत्ययकारिणी। श्विष्टो रोगो दरिद्रस्याच्छिद्रं। भिद्रं व
ज्रं। मंद्रः। वंद्रः। पवाघविवंदेपि। हिमांशुश्चंद्रमाश्चंद्रः शशी चंद्रो हिमद्युतिः। दस्रोश्विः।
दस्रः स्ववैद्यः। दभ्रः समुद्रः स्वल्पंव वसेः संप्रसारणे। नरपरसृपिसृजिस्पृशिस्पृ
हिसवनादीनां। रेफपरस्य सकारस्य सृप्यादीनां सवनादीनां च मूर्द्धन्यो न स्यात्। तापू
र्वपदादिति प्राप्तः प्रतिषिध्यत इति वृत्तिर्भर्योपि प्रायाते न शासि वसीति प्राप्तम
पि नात्र स्त्रोरश्मिः। त्रस्राग्नौः। वाश्रो दिवसः। वाश्रं मंदिरं। शीरोऽजगरः। हस्रोम्
र्खः। स्निध्रः साधुः। शुभ्रं। शुसे दक्वाकुनकात्। शुस्तं च स्तु। वकिरम्यो रुवोपधायाः।

वृकमल्लइव्यां। रुमो रुरणः। बौकसेः। दिकुसत्वंदः। अमितम्योर्दीर्घश्च। आमं। तामं। नि
दे र्नलोपश्च। निंद्रा। अर्देर्दीर्घश्च। आर्द्रं। सुवेर्दश्च। सुद्रः। दुरीणो लोपश्च। दुःखेनेप
ते प्राप्यते इति दूरं। कृतेश्छ क्रूच। कृच्छ्रं। क्रूरः। रोदेर्णिलुक् च। रोदयतीति रुद्रः। बहुल
मन्यत्रापि संज्ञाछंदसोः। णि लुगिल्येवा। वांति पर्णान्युषो वाताः ततः पर्णमुचो पदेः। जो
रो वाजीरो णुः। ज्यश्चेत्येके। सुलूधा गृधिभ्यः क्रन्। सुरः। सूरः। धीरः। गृध्रः। शुसिचि
मीनां दीर्घश्च। शुः सो ऋः। सूरः। सीरं। चीरं। मीरः समुद्रः। चाविंधेः। वीध्रं विमलं। ऋधिव
पिभ्यां रन्। वध्रं चर्म। वप्रः प्राकारः। ऋज्रेंद्राग्रवज्रविप्रकुब्रचुब्रक्षुरखुरभद्रोग्र

नेरमेलस्तु कः शुक्लः गौरवन्ने रामात्वाः। रन्नंताऊनविंशतिः। निपातनाद्गुणाभावः।
ञत्रौ नायकः। इङ्क्षिङ्द्रुः। लंजोर्न लोपः। अग्रं वज्रौ सत्री हारके पवौ। डुवप्। उपधा
याद्त्वं। विप्रः। कुंबिवुंब्योर्न लोपः। कुम्भ मरण्यं। बुभ्रं मुखं। क्षुर विलेखने। रेफलोपः
अगुणः। क्षुरः। खुर छेदने। रलोपो गुणाभावश्च। खुरः। मंदेर्न लोपः। मद्रं। उब सम
वाये। बस्यगः। उग्रः। भिभी। भेरी। पल्ले लः। मेलो जलतरणद्रव्यं। बन्धो विभागी। इणो
गुणाभावः। इरा मद्ये च वारिणि। मामाने मालाः। समिक समुत्कर्षे। कसगतौ। सम्यक्
संतिपत्नायं तेजनात् अस्मादिति संकसुकः। दुर्जनः। अस्थिरश्चापवि नश्शोऽल्पे कं कं तु
शुचेश्चस्यकः। शुक्रः। पल्लेलः। शुक्लः। गुरुः। वृद्धिः। गौरोऽरुणे सिते पीते। वनसम्भ्रको॥ ३

मौर्वी। पवेः कः। पाकुकः। सूपकारः। नशेर्तुम्। नंस्तुकः। भियः कुकन्। भीरुकः। कु
न्विधिस्वियसंज्ञयोरपदर्वस्यापि। रजकः। दंशेश्च कुटूकः। वरकः। वषभक्षणे। वषकः। मु
नकः। भषकः। रमेरश्च लोवा। रमको विलासी। लमकः। जहातेर्द्वे वा। जहकः त्यागी। का
लेश्च। ध्मोध्मश्च वा। ध्मकः। कर्मकर्षः। हनो वधश्च वा। वधकः। बकुलेमन्यत्रापि। कुह
विस्मापने। कुहकः। कृतकं। कषेर्वृद्धिश्चोदीचां। कार्षकः। कृषकः। नदकं वा। प्रपं वार्थं।
वृश्चिकृषोः किकन्। वृश्चिकः। कृषिकः। प्राङ्पणिकषः। प्रापणिकः। पण्यविक्रयी।
प्राकषिकः। परदारोपजीवी। मुषेर्दीर्घश्च। मूषिकः। आखुः। स्यमेः संप्रसारणं वा। वा

द्दीर्घः। सीमिको वृक्षभेदः। क्रियद्दकन्द। कयिकः केता। ऽपाङ्गि पाणि पनि पतिरवनिभ्यः।
ऽआपणिकः। ऽआपनिकः। द्दंद्रनीलः किरातस्त्वा। ऽआपतिकः श्येनः। देवायतस्त्वा। ऽआरव
निको मृषिको वराहस्त्वाश्या ल्याहृ अविभ्यद्दनव्रु। श्येनः। ल्येनः। हरिणः। ऽअविनो ध्व
युः। वृजेः किब्बा। वृजिनं। ऽअजेरज वा। वी भाव बाध्य नार्थे। ऽअजिनं। बकुलमन्यत्रापि। कठि
नं। मलिनं। नलिनं। कुण्डिनं। घतेः। यत्यरूषिदि नं दिवसोपि दिनं। द्रुदक्षिभ्यामिनन्
द्रविणं। दक्षिणः। दक्षिणा। ऽअर्त्तेः किद्द्वा। द्दरिणं स्वन्यं। वेपितुप्योर्ह्रस्वश्चा। विपिनं।
तुहिनं। तलिपुलिभ्यां वा। तलिनं विरले स्तोके स्वच्छेपि तलिनं त्रिषु। पुलिनं। ग

वैरतञ्च॥ गोरादित्वान्ङीष्॥ गुर्विणी॥ गर्भिणी॥ रुहेश्च॥ रोहिणः॥ महेरिनण्च॥ वा
दिनन्नूः॥ माहिनं॥ महिनं राज्यं॥ क्विब्वचिप्रच्छिश्रिस्रुद्रुप्रुज्वां दीर्घोऽसंप्रसारणं च॥ वाक्॥
प्राट्॥ श्रीः॥ स्रवत्यतो घृतादिकमिति स्रूर्यज्ञोपकरणं॥ द्रूर्हिरण्यं॥ कटप्रूः कामरू
पी कीटश्च॥ जूः सरस्वत्यां पिशाच्यां जवने स्त्रियां॥ आप्नोतेर्ह्रस्वश्च॥ आपः॥
२ श्र अपः॥ अद्भिः॥ अप्सु॥ परौ व्रजेः षः पदान्ते॥ व्रजेः क्विप् दीर्घो स्तः पदान्ते तु षश्च॥ परिव्रा
ट्॥ परिव्राजौ॥ ह्रुवः स्रुवच॥ जुहूः॥ स्रुवः॥ कः॥ स्रुवः॥ विक्रो॥ डकारश्चाद्वारणार्थः॥ कटत्॥ राम
कुत्वं॥ स्रुक्॥ स्रुवं च स्रुवश्च संपदादि॥ तनोतेरनश्च वः॥ तनोतेः क्विप् प्रत्ययः अनोश्च ५१

शूद्रे शूद्रस्वालके । ग्लानुदिभ्यां डौः । ग्लौः । नौः । द्वि रव्ययं । औ रित्येव । ग्लौ करोति । कृन्मेजं
त इति सिद्धे नियमार्थमिदं । उण्णादिप्रत्ययांतः । अव्ययं तत एवेति । रातेर्डैः । राः । रायौ । रायः ।
गमेर्डोः । गौः । गो नादित्ये बलीवर्दे किरणे क्रतुभेदयोः । स्त्री तु स्यादिशि भारत्यां भूमौ च सु
रभावपि । नृस्त्रियोः स्वर्गवज्राम्बुरश्मिदृग्बाणलोमसु । बाहुलकाद् द्युतेरपि डोः ।
द्योः स्त्री स्वर्गांतरिक्षयोः । भ्रमेश्च डूः । भ्रूः । बाहुमेः । अग्रेगूः । दमेर्डोसिः । दोः । दोषौ । प
णेरिन्यादेश्च वः । वणिक् । स्वार्थे ऽण् । नैगमो वाणिजो वणिक् । वधः । कित् । जक्षि गर्गो
पतेपिवा । भ्रमश्च । भुरिक् । भूमिः । जसि सहे हरिन् । जसुरिर्वज्रं । सकृदित्यादि त्यः । प

सि॰ कौ॰ उ॰ प्र॰

२३३

धिवीवा। सुयुरुवृञो युच्। सवनश्चंद्रमाः। यवनः। रवणः। कोकिलः। वरणः। अश्मे
रश्मा वा। अश्नोतेर्युच्स्यात् रशादेशश्च। रशना कांचीजिह्वा वा। लटित्यस्य सकारवान्। उंदे
र्नलोपश्च। उदनः। गमेर्गश्च। गमेर्युच्स्यात् गश्चादेशः। गगनं। बहुलमन्यत्रापि। युच्स्या
त्। स्यंदनः। रोचना। रंजेः क्युन्। रजनं। भूसूधूभ्रस्जिभ्यश्छंदसि। भुवनं। सुवनं आदि
त्यः। धुवनो वह्निः। निधुवनं। सुरतं। भ्रज्जनं। अंबरीषं। कृपृवृजिमंदिनिधाञः क्युः।
किरणः। पुरणः। समुद्रः। वृजनमंतरिक्षं। मंदनं स्तोत्रं। निधनं। धृषेर्द्विषवसंज्ञायां।
धिषणो गुरुः। धिषणा धीः। वर्त्तमाने पृषद्बृहन्महज्जगच्छतृवच्च। अतिप्रत्ययांताः।

राम
५८

र पृषे वने गुणाभावः। पृषंति। बृहत्। महान्। गमेर्जगादेशः। जगत्। संश्चत्तृपद्वेहत्।
एते निपात्यंते। पृषत्करणं शतृव द्भावनिवृत्त्यर्थं। संचिनोतेः सुट्। इकारलोपः। सं
श्चत्। कुहकः। तृपच्छत्रं। विपूर्वाद्धंतेर्नि लोपः इतएवा वेहद्गर्भोपघातिनी। छंदस्यँसा
नच्श्रुजृभ्यां। श्रवसानः पंथाः। जरसानः पुरुषः। ऋंजिवृधिमंदिसहिभ्यः कित्। ऋंजसा
नो मेघः। वृधसानः पुरुषः। मंदसानो ऽग्निः। जीवश्च। सहसानो यज्ञः मयूरश्च। अर्तेर्गु
णः। शुट्च। अर्शसानो ऽग्निः। सम्यानच्स्तुवः। संस्तवानो वाग्मी। युधिबुधिदृशः किच्च। युधु
धानः। बुधानः। दृशानो लोकपालः। हुर्छेः सनो लुक्छलोपश्च। जुहुराणः चंद्रमाः। धि

सि० कौ० उ० वृ०
२३४

ते ई न्स्वा। शिश्वि दानः। पु एय कर्मा। तृन्तृचौ शंसि क्षदादिभ्यः संज्ञायां वा निटो। शंसादि
भ्यः क्षदादिभ्यश्च क्रमात् तृन्तृचौ स्तः तौ वा निटो। शंस्तांस्तो ता। शंस्तारो। शंस्तरः। क्षदिः
सो ओष्यातुः। शकलीकरणे भक्षणे वा। अनुदात्तेत्। वक्ष्ये वक्षदानं इति मंत्रात् उ
क्षाणं वा वेहतं वा क्षदंते इति ब्राह्मणं च। क्षत्ता स्या सारथौ द्वा स्थे वैश्यायामपि शूद्रजे।
बहुलमन्यत्रापि। मन्ता। मन्ता। हन्ता। हन्ता। नप्तृ नेष्टृ त्वष्टृ होतृ पोतृ भ्रातृ जामातृ मा
तृ पितृ दुहितृ। नपतं त्यनेन न प्ता। पौत्रो दौहित्रश्च। नयतेः षुग्गुणश्च। नेष्टा। त्विषे रि
तो त्वं। त्वष्टा। होता। पोता। भ्राजते ऋ लोपः। भ्राता। जायां माति जामाता। मान पूजायां।

राम
५९

२ स्वसारौ।

नलोपः। माता। पातेर्डाकारस्य इत्वं। पिता। दुहेस्तृच इटू गुणाभावश्च। दुहिता। सु
ष्यसेर्ऋन्। स्वसा। यतेर्वृद्धिश्च। याता। भार्यास्तु भ्रातृवर्गस्य यातरः स्युः परस्परं। न
भि वनंदेः। ननंदति ननांदा। इह वृद्धिर्नानुवर्त्तत इत्येके। ननांदा तु स्वसा पत्युर्ननंदा नं
दिनी च सेति शब्दार्णवः। दिवेर्ऋः। देवा। देवरः। नयतेर्डिच्च। ना। नरौ। नरः। सव्ये स्थः छंदसि।
अंबांबेत्यत्र स्थास्थिन्स्थॄणामुपसंख्यानं। सव्येष्ठा सारथिः। सव्येष्ठरौ। सव्येष्ठरः। अ
र्त्तिसृधृधम्यम्यश्यवितृभ्योऽनिः। ऋधृभ्योऽनिः प्रत्ययः स्यात्। अरणिः। अग्नेर्यो
निः। सरणिः। धरणिः। धमनिः। अमनिर्गतिः। अशनिः। तरणिः। बाहुलकात् रजनिः। सूर्यः।

स्थू

ऽऽङ्गि सुषे: सनः पुं दसि। ऽपा सुमु क्षणि:। ऽग्निर्वातस्त्रा। कषे रादे स्वव:। वर्षणि र्जी
नः। ऽदे मुद्गु। ऽप घनिरग्नि:। वतेश्चावर्त्तनि:। गोवर्द्धनस्तु वका रान्मुद्गा वर्त्मनि दित्या
हा क्षिपे: क्रिया क्षिपणि रायुधं। ऽर्चिर्मुखि कुसपि भ्रादि खुर्दिभ्यः सि:। ऽर्चिर्ज्वाला
ऽद्दंतो पयं। ऽग्येर्भ्राजंते ऽर्वयः। शो विदीप्ति:। हविः सर्पि:। द्रक्षिन्निति ह्रस्व:। छदि:
पटलं। छर्दिर्वमनव्याधि:। ऽद्दंतोपि। छर्पताली सार स्रूजवान्। बंहे र्नलोपश्च। बर्हिर्नाकु
शाखु भणो:। पुते रिसि न्नादे स्वज:। ज्योतिः। वसौ रुवे: संज्ञायां। वसु रो विपर्यस्त:। भुवः कि
ता भुविः समुद्र:। सहो धश्च। सप्थिरनङ्वान्। पिबतेस्तुक्। पाथि श्चक्षु: समुद्रयो:। जनेरु

स्रिः। जनुर्जननं। मनेर्धश्चं दसि। मधुः। ऽर्त्ति पृ वपियजितनिधनितपिभ्यो नित्। ऽपरुः।
परुर्ग्रंथिः। वपुः। यजुः। तनुः। तनुषी। तन्वं षि। धरैन्तु स्त्रियां। धनुर्वंशविशुद्धोपि निर्गु
णः किं करिष्यति। सांतस्य छंदंतस्य वा रूपं। तपुः सूर्याग्निशत्रुषु। एतेर्णिच्च। ऽआयुः। ऽआ
युषी। वक्षेः स्त्रिच्च। वक्षुः। मुहेः किच्च। मुहुरव्ययं। बहुलमन्यत्रापि। ऽआवक्षुः। परिवक्षुः।
कृगृशृवृञ्चतिभ्यः ष्वरच्। कर्वरो व्याघ्ररक्षसोः। गर्वरोहंकारः। शर्वरी रात्रिः। वर्वरः।
प्राकृतो जनः। चत्वरं। नौ सदेः। निषद्वरस्तु जम्बालः। निषद्वरी रात्रिः॥ ॥इत्युणादिषु
द्वितीयः पादः॥ ॥छित्वर छत्वर धीवर पीवर मीवर चीवर तीवर नीवर गह्वर कट्टर सं

सि० कौ० उ० ऋ०
२३५

यद्वराः। एकादशाष्वरच् प्रत्ययांता निपात्यंते। छिदिर् छुद् अनयोस्तकारो तादेशः। छि-
देर्गुणाभावश्च। छित्वरो धूर्त्तः। छत्वरो गृहकुंजयोः। धीवरः कैवर्त्तः। पीवरः स्थूलः। मी-
वरो हिंसकः। चिनोतेर्दीर्घश्च। चीवरं भिक्षुप्रावरणं। तीवरो जातिविशेषः। नीवरः परिव्रा-
ट्। गाहतेर्ह्रस्वत्वं। गह्वरं। कटेवर्णादौ। कट्वरं व्यंजनं। यमेरीकारः। संयद्वरो नृपः। पदेः
संपद्वर इत्येके। इण्सिञ्जिदीङुष्यविभ्यो नक्। इनः सूर्ये नृपे पत्यौ। सिनः काणः। जिनो-
ऽर्हन्नादीनः। उष्णः। ऊनः। फेनमीनौ। एतौ निपात्येते। स्फायतेः फेनः। मीनः। कृषेर्वर्णे।
कृष्णः। बंधेर्ब्रधिबुधौ च। ब्रध्नो बुध्नः। धापॄवस्यज्यतिभ्यो नः। धाना भ्रष्टयवे स्त्रियः। प

राम
६१

णीं। पत्रं। पर्णः। किंशुकः। वस्त्रो मन्ये वेतने वा- प्रजेवी। वेनः। प्रत्न- आदित्यः। बाकुलका
त् सृणोतेः श्रोणः। पंगुः। लक्ष्मे रघु । लक्ष्मे सुरादिल्यं ता नः स्या त्तँड़ा गमस्य। वान्मुट्टि
स्येके। लक्ष्मणं। लक्ष्मणं नाम्नि विद्धे वा। लक्ष्मणो लक्ष्मणस्य रामभ्राता। लक्ष्मणाहं
सयोषायां सार सस्यव लक्ष्मणः। वनेरिद्धोपधायाः। वेन्ना नदी। निवेष्टेर्व वा दाघों
घीरणः सामर्थ्यान्निगुणः। स्यून- आदित्यः। बाकुलकाल्केव लौनः। ऊरु। अंतरंगत्वाघ
णः। गुणः। स्योनः। कृदन्त सिंदु पन्य निस्वपि म्यो नित्व। कर्णः। वर्णः। जर्ण- श्वंद्रे व वक्षे
वासे नाह्रेणः। पन्नो नीवे र्गतिः। अन्न मोदनः। स्वप्नः निद्रा। प्येटद्व। प्येनः सिंधुः।

सि॰ कौ॰ उ॰ सू॰
२३१

नदी धेना। तृषिसुषिरसिभ्यः कित्। तृष्णा। सुष्णः सूर्यो वह्निश्च। रस्नं द्रव्यं। सूनो दीर्घ
श्च। सूना वधस्थानं। रमेस्त च। रमयतीति रत्नं। रास्नासास्नास्थूणावीणाः। रास्ना गं
धद्रव्यं। सास्ना गोगलकंबलः। स्थूणा गृहस्तंभः। वीणा वल्लकी। गादाभ्यामिष्णुच्।
गेष्णुर्गायनः। देष्णुर्दाता। कृत्यशूभ्यां क्स्नः। कृत्स्नं। अक्ष्णम् अखंडं। तिजेर्दीर्घश्च। तीक्ष्णं।
श्लिषेरच्चोपधायाः। श्लक्ष्णं। यजिमनिशुन्धिदसिजनिभ्यो युच्। यज्युरध्वर्युः। मन्युः
दैन्ये क्रतौ क्रुधि। शुन्ध्युरग्निः। दस्युस्तस्करः। जन्युः शरीरी। भुजिमृङ्भ्यां युक्त्यु
कौ। भुज्युर्भाजनं। मृत्युः। सर्तेरयुः। सरयुर्नदी। सरयूरिति पाठांतरं। सरयूः। पानी

राम
६२

विषिभ्यः पः। पाति रक्षत्यस्मादात्मानमिति पापं। तपोयोगात्पापः पुरुषः। नेपः पु
रोहितः। बाकुलेनका कुणप्रभावे नीपो वृक्षविशेषः। वेप्यः पानीयं। क्षुपः किञ्च। क्षुपो
वृक्षे। स्तुवो दीर्घश्च। स्तूपः समुच्छ्रायः। स्तुभ्यां निश्च। बाल्कितः दीर्घः। स्तूपः। बाकुले
कादुत्वं। सूर्पग्र। कुशुभ्यां वा। कुर्वन्ति मंडूका अस्मिन्निति कूपः। प्लुवन्ति वभ्रंत्यस्मिन्नम्
स्तुमिति पूपो यज्ञस्तंभः। खष्पशिल्पशष्पबाष्परूपपर्पतल्पाः। सप्तैते पप्रत्ययां
ताः। खनतेर्नकारस्य षत्वं। खष्पः क्रोधबलात्कारौ। शीलतेर्ह्रस्वः। शिल्पं। कौशलं।
शसु हिंसायां। निपातनात्षत्वं। शष्पं। बालतृणं। प्रतिभाक्षयश्च। बाधतेः षः। बाष्पो

सि॰ कौ॰ उ॰ कृ॰

२३८

नेत्रजजलौघमलेः। बाष्पं वा। शेते दीर्घः। रूपं स्वभावे सौंदर्ये। रु। पर्पं गृहं बालतृणं

पंगुपीठं वा तल्पप्रतिष्ठाकरणे। चुरादिभ्यो कुः। तल्पं शय्या दारेषु। स्तनि हृषि

पुषि गदि मदिभ्यो णेरित्नुच्। अयामन्तेति णेरयादेशः। स्तनयित्नुः। हर्षयित्नुः। पोषयि २३

त्नुः। गदयित्नुः वावदूकः। मदयित्नुः मदिरा। कृहनिभ्यां क्त्नुः। कृत्नुः शिल्पी। हत्नु

र्व्याधिः शस्त्रं वा। गमेः सन्वच्च। जिगत्नुः। दाभाभ्यां नुः। दानुर्दाता। भानुः। वचेर्गश्चाव

ग्नुः। धेट इच्च। धयति तामिति धेनुः। सुवः कित्। सूनुः पुत्रः। नुजेर वो। जहातेर्द्वे अं राम

तलोपश्च। जह्नुः। स्थो णुः। स्थाणुः। कौ जे स्थि रेह रे। अजिवृरीभ्यो निच्च। अजेर्वी ५३

वेलुः। वर्णुद्दृदेश जेदयोः। हेलुर्हृदयोः स्त्रियां भूर्जिः। विषेः किट्ठा विल्लुः। रुदा धारा
विकलिभ्यः कः। बाकुलेकान्तकस्येसंज्ञा। कर्कोटवल्लघोटकः। दाकोदाता। धार्को
नहुन्नृः। श्राध्यारक्षा। राकापोर्णमासी। अर्कः। कल्कः पापाशये पापे दंभे विट्कि द्वयो
रपि। स्तव मस्तविमुषिभ्यः ककः। स्तवक उत्सवलवातयोः। वृकः श्वापदकाकयोः। मस्कं
छिद्रं। मुष्कं। मुष्कोऽण्डं। स्तुकवल्ककोल्काः। स्तुभेरंत्यलोपः। स्तुकः। वल्कं वल्कलमास्त्रि
यां। व्रषदाहेषस्यलः। उल्का। द्रष्टएरभीकापाशल्यति मर्षिभ्यः कन्। एके तु रव्यान्यके
बलाः। भेको मंडूकमेघयो हितिविम्बमेदिन्यो। काकः। पाकः। शिशुः। शल्कां शकलं। प

ञि० कौ० उ० कृ०
२३५९

त्कः पथिकः शारीरावयवश्च मरुत्ः शरीरवायुः । नोहः । उह्यते ः कन्स्यान्नो । निहाकाशोधिका ।
नौसदेर्द्विश्च । निष्को स्त्रीँ ह्निमितल्लवे । स्यमेरीद्रु । स्यमीकोवल्मीकः । वृक्षभेदश्च । ददृहू
स्वद्यतिकेवित् । स्यमिकः । अजियुपूनीभ्योदीर्घश्च । वीकः स्याद्वातपक्षिणोः । सूका । सूको
वायुः । कौनी वृक्षविशेषः । ह्रियो रश्च लोवा । ह्रीका ह्रीका त्रपा मता । शाकेरु नोंतोसुनयः । जन
जंतजंतिजनिएते चत्वारः स्युः । शकुनः । शकुंतः । शकुंतिः । शकुनिः । गुवोन्हिवू । भवंतिर्वर्तमा
नः कालः । बाऊलेकात् । अवेश्च । अवंतीं । वदेर्वदंतिं । वदंती । किंवदंती जनः श्रुतिः । कन्युवृश्चि
षेश्च । वाद्रुवः । क्षिपण्युर्वसंतः । इत्युभ्रवलेदलः । गुवन्युः स्वामि सूर्ययोः । अनुडू नदेश्च । वा

राम
६४

क्षिपेः। नदत्नु मेघः। क्षिप्रत्नुर्वातः। कृवृदारिभ्य उनन्। करुणो वृक्षभेदः स्यात्। करुणा
व कृपा ममता। वरुणः। दारुणो। त्रो रश्च लो वा। तरुणः तलुनो युवा। क्षुधिपिशिमिथिभ्यः
कित्। क्षुधुनो म्लेच्छजातिः। पिशुनः। मिथुनं। फलेर्गुक्च। फल्गुनः पार्थः। स एव। फाल्गु
नः। अशेर्लश्च वा। लशुनं। अर्जेर्णिलुक् च। अर्जुनः। तृणाख्यायां चित्। चित्वादंतोदात्तः। अ
र्जुनं तृणं। अर्तेश्च। अरुणः। अजियमिशीङ्भ्यश्च। वयुनं देवमंदिरं। यमुना। शयुनो ऽज
गरः। वृतृवदिहनिकमिकषिभ्यः सः। वर्सं। तर्सं प्लवसमुद्रयोः। वत्सः। वत्सं वक्षः। हंसः। कं
सो ऽस्त्री पानभाजनं। कक्षः। प्लुषे रच्चोपधायाः। प्लक्षः। मनेर्दीर्घश्च। मांसं। अशेर्देवने। अ

सि० कौ० उ० सू०
२८०

सः। स्नुव्रश्चिकृत्यृषिभ्यः कित्। स्नुषा। वृक्षः। ऋक्षमुदकं। ऋक्षं नक्षत्रं। ऋषेर्जातौ। ऋक्षो
ऽद्रिभेदे भल्लूके। उंदिगुधिकुषिभ्यश्च। उक्षः। प्रस्रवणं। वा। दि। गुक्षः स्तवकः। कुक्षो जठरं।
गृधिपण्योर्दकौ च। गृत्सः कामदेवः। पक्षः। अश्रेः सरः। अक्षरं। वसेश्च। वत्सरः। संपूर्वाच्चि
त्। संवत्सरः। कृधूमदिभ्यः कित्। वा कुल्यकान्नपत्वं। कृसरः स्यात्तिलौदनं। धूसरः। म
त्सरः। मत्सरा मक्षिका हेया भंभरालीव सा मता। पतेरश्वलः। पत्सलः पंथाः। तन्यृषिभ्यां
क्सरन्। तसरः सूत्रवेष्टने। ऋक्षरः सत्विक्। पीयुक्वणिभ्यां कालन् ह्रस्वः संप्रसारणं च। राम
पीयुः सौत्रः। पियालो वृक्षभेदः। कुणालो देशभेदः। कठिकुषिभ्यां काकुः। कठाकुः पक्षी। कु ६५

ष्पाकु रग्निः सूर्यश्च । सर्वोर्ऽङ्को । स्त्रदाकुर्वीत सरितोः । वृते वर्द्धिश्च । वार्त्ताकुः । वाकुलकाकुका
रस्य ःऽत्वं । वार्त्ताकं । पर्दर्निःस्वप्रसा रएमऽोपश्च । एदाकुर्दस्थिके व्याघ्रेवित्रकेव सरीसृपे ।
सपुत्रविभ्यो न्युजागूज क्रुवः । ऽन्युवू ऽागूवू ऽन्क्रुवू एते क्रमात्स्युः । सरएगुर्मेघवातयोः ।
यवागूः । ववक्रुर्विप्रवाग्मिनोः । ऽानकः शाङ्भियः । स्थानकोऽजवादः । भयानकः । ऽाएको
ऽरस्रशिंघि ऽाँभ्यः । लवाएकं । दात्रं । प्यवाएको दीनार भागः । ऽ ऽुकदर्विहेमिनः छपदाहे ।
षस्यरः सुकप्रत्ययश्चाछ ऽुकं । व्वरदंगारं । दएतेर्विः । दर्विः । जुहोते मिनिः । हेमी । क्रियः कु
कूरस्वलोवाद्रीकुः । क्रोकुः । लज्ञावान् । हस्तिमयि एरवामिदमिलेरप वृविंस्य स्तनौ । दरास्य

वातः । शिंघाणकः श्लेष्मा । वृषोदरादित्वात्महेकलो
पः । शिंघाणं नासिकामले । ऽाएको २

सि॰ कौ॰ उ॰ सू॰
२४१

स्तन्स्यात्तातिलुत्रेतिनेट्। हस्तः। मर्त्तः। गर्त्तः। एतः कर्बुरः। वातः। ऽन्तः। दंतः। लोतः स्यादश्रु
विरूपयोः। पोतो बालेव हित्रयोः। धूर्त्तः। बाकुलकान्नुसेदीर्घ स्यात्स्तपापं स्फूलिजिर्नटावान
स्यापद्ध। नापितः। तनिमृङ्भ्यां किच्च। ततं। मृतं। ऽञ्जिघृसिभ्यः क्तः। ऽक्तं। घृतं। सितं। दुत
निभ्यां दीर्घश्च। दूतः। नीतः। जेर्मूद्रोदात्तः। जीमूतः। लोष्टपलितौ। लुनातेः कः। तस्यस्तु ह्रस्वातो
गुणः। लोष्टं। पलितं। हृश्यामश्यामितन्न्। हरित श्येतौ वर्णभेदौ। रुहे रश्च लो वा। रोहितो मृग
मत्स्ययोः। लोहितं रक्तं। पिशेः किच्च। पिशितं मांसं। स्नुदक्षिस्पृहिगृहिभ्य आय्यः। ऽदधाते रामः
द्वित्वमित्वं शुक्लं। मित्रदेवयोर्दिधिषाय्यः। वन्न एध्यः। वरेण्यः। स्तुवः। कसेय्यः। दसि। स्तु ६६
श्रवाय्यो यज्ञपशुः। दक्षाय्यः। गरुडो गृध्रश्च। स्पृहयाय्यः। गृहयाय्यो गृहस्वामी। दिधिषाय्यः। र

षेध्यं तुरुवर्पसं। राजेरन्यः। राजन्यो वह्निः। सूरम्यो श्वा। सारएयं। रमएयं। ॰अतैर्निशा। ॰अरएयं।
जैपेन्यः। पशुसेवनेषस्यजः। पर्जन्यः। एकमेद्योः। वदेशन्यः। वशन्यस्त्याग्निवाग्मिनोः। ॰अमि
नक्षियज्ञिवधिपतिभ्योऽत्रन्। ॰अमत्रं भाजनं। नक्षत्रं। यजत्रः। वध्यत्रमात्रपुष्पं। पतत्रं। तन्द्रुरुहं।
गडेशदे स्वकः। कडत्रं। उत्वयोदेकत्व स्मरणं। लकलत्रं। ॰अश्वित्। वरत्रा। वर्ममयी रज्जुः। सु
विदेः कत्रः। सुविदत्रं कुटुंबकं। कृतेर्तुम्न। कृंतत्रं। ञोगलं। ॰भस्मद्दृशि यज्ञिपर्वि पच्यमितिं
मिनमिहर्षिभ्यो तन्। दशभ्योऽतन्प्या त्। भरतः। भरतो मलुः। दर्शतः सोमसूर्यायोः। यजतः
सत्विक्। पर्वतः। पचतोऽग्निः। ॰अमतो रोगः। तमतस्तृष्णापरः। नमतः प्रह्वः। हर्यतोऽश्वः। दषि

रंजिभ्यां कित्। वृषभो मरुतो बिंदुश्च। रजतं। खजतिः। खजतेः सञ्ज्ञो ऽपः। अतच् प्रत्ययां
तस्य इत्वं वा। खजतिर्निघंटौ। शक्रिरः। शीङ् शपि रुगमि वंचि जीवि प्राणिभ्यो ऽथः। सप्तभ्यो
ऽथः स्यात्। शयथो ऽजगरः। शपथः। रवथः कोकिलः। गमथः पथिकः। पंथाश्च। वंचथः। धू
र्तः। वंदातिपाठे वंदते र्वैपदते र्वा। वंदथः। स्तोता। स्तुत्यश्च। जीवथः। आयुष्मान्। प्राणथो बल
वान्। वायुः कुलेका तुश्च। भिदभिभ्यां। शमथस्तु शमः। शांतिर्दांतिस्तु दमथो दमः। भृञश्चित्।
भरथो लोकपालः। रुहिविदिभ्यां ङित्। रोहतीति रुहथः। शिशुः। वेत्तीति विदथः। उपस
र्गे वसेः। आवसथो गृहं। संवसथो ग्रामः। अत्यविचमितमिनमिरभिलभिनभितपिपति

राम
६१

पनिपलिमहिभ्योऽसच्॥ त्रयो दशभ्योऽसच् स्यात्॥ अततीत्यतसः वायुरात्मा वा॥ अ
वतीत्यवसः राजा भानुश्च॥ वमंत्यस्मिन्नवमसः॥ सोमपानपात्रं॥ ताम्यंत्यस्मिन्तमसः
ऽंधकारः॥ नमसः अनुकूलः॥ रभसो वेगहर्षयोः॥ जभसो धनं॥ यावकश्च॥ नभ्यति न
भाति वा नभसः॥ आकाशः॥ तपसः॥ पतसः॥ पक्षी चंद्रश्च॥ पनसः॥ कंटकिफलः॥ पणसः प
ण्यद्रव्यं॥ महसं ज्ञानं॥ वेमस्तुंतु॥ बाकुलकादत्वाभावः॥ वेतसः॥ वहियुभ्यां णित्॥ वाहसोऽज
गरः॥ यावसस्तृणसंघातः॥ वयश्च॥ वयगतौ॥ वायसः काकः॥ दिवः कित्॥ दिवसं दिवसः॥ कृ
शृशलिकजिगर्दिभ्योऽभच्॥ करभः॥ शरभः॥ शलभः॥ कलभः॥ गर्दभः॥ ऋषिवृषिभ्यां

कित्वा। ऋषभः। वृषभः। रुषेर्नित्वुक्षू वा। अस्मादभच् नित् किः स्यात् वुपादेशश्च वुषभो
मत्तदंतिनि। राक्षिवक्षिभ्यां वा। रासभः। वक्षभः। अद्विशिभ्यां ऋच्। अदंतो महिषः। वेशंतः
पल्वलं। रुहिनंदिजीविप्राणिभ्यः षिदाशिषि। रोहंतो वृक्षभेदः। नंदंतः पुत्रः। जीवंतः अ
षध्यं। प्राणंतो वायुः। षित्वान्ङीष्। रोहंती। तृभूवहिवसिभासिसाधिगडिमंडिजिनंदिभ्य
श्च। दृशिभ्यो ऋच्। स्या सर्वा षित्। तरंतः समुद्रः। तरंती नौका। भवंतः कालः। वहंतो वायुः। व
संतस्तुः। भासंतः सूर्यः। साध्यंतो भिक्षुः। गडेर्घटादित्वान्मित्वं ह्रस्वः। आयामंतेति एरयः।
गडयंतो जलदः। मंडयंतो भूषणं। जयंतः शक्रपुत्रः। नंदयंतो नंदकः। हंतेर्मुट् च हिवाहेमंतः। राम ६८

नं देर्नलोपश्च। नंदंतः। प्रव्रजितः। सछेदरः। सछ्वरा वेश्या। वाकुलकाः। अजिर उर्क् सादयः। अ
र्त्तिकमिभ्रमिचमिदेविवासिभ्यश्चित्। षड्भ्योऽरच्छ्रि स्यात्। अररं कपाटं। कमरः कामु
कः। भ्रमरः। चमरः। देवरः। वासरः। कुवः क्ररन्। कुररः पक्षिभेदः। अंगिमदिमंदिभ्य आर
न्। अंगारः। मदारो वराहः। मंदारः। गडेः कडश्च। कडारः। शृंगारभृंगारौ। शृभृभ्यामार
न्नुम्गुक ह्रस्वश्च। शृंगारो रसः। भृंगारः कनकालुका। कंजिमृजिभ्यां चित्। कंजिः सौत्रः।
कंजारो मयूरः। मार्जारः। कमेः किदुपधायाः। इदित्यनुवर्त्तते। कितो दंतः। कुमारः। तुषारा
दयश्च। तुषारः। कासारः। सहारः। आम्रभेदः। दाङो नुड्ढ्रा। दीनारः सुवर्णाभरणं। सर्त्तेरपः

शुष्का। सर्षपः। उषिकुटि दलिकवि खजि भ्यः कपन्। उषपो वह्नि सूर्ययोः। कुटपो मानभांडं।
दलपः प्रहरणं। कवपं शाकपत्रं। खजपं घृतं। कैः संप्रसारणं वा। कुणपं। कपश्वाकव
र्मणस्या। स्वरे भेदः। विटपविष्टप विशिपो लपाः। चत्वारोऽमी कपन्प्रत्ययांताः। विटशाखे। विट
पः। विश्वतेरादेः पः प्रत्ययस्य लुड्। षत्वं। विष्टपं भुवनं। विशितेः प्रत्ययादेरित्वं। विशिपं मंदि
रं। वलतेः संप्रसारणं। उलपं कोमलं तृणं। वृतेस्तिकन्। वर्तिका। कृतिभिदिलतिभ्यः कित्।
कृत्तिका। भित्तिका भित्तिः। लत्तिका गोधा। इष्यशिभ्यां तकन्। इष्टका। अष्टका। इण स्तशन्त
शसुनौ। एतशो ब्राह्मणः। स एव एतशः। वीपतिभ्यां तनन्। वीगत्यादौ। वेतनं। पत्तनं। दृदलि

राम
६९

भ्यां भः। दर्भः। दम्भः स्याद्दविव क्रथयोः। अर्त्तिगृभ्यां भन्। अर्भः। गर्भः। इणः कित्। इभः।
असिसंजिभ्यां क्थिन्। अस्थि। सक्थि। प्लुषिकुषिशुषिभ्यः क्सिः। प्लुक्षिः वह्निः। कुक्षिः।
शुक्षिः वातः। अशेर्नित्। अक्षि। इषेः क्सुः। इक्षुः। अवितृस्तृतंत्रिभ्य ईः। अवी नारी रज-
स्वला। तरीः नौः। स्तरीः धूमः। तंत्रीः वीणादेर्गुणः। यापोः किद्द्वे च। ययीरश्वः। पपीः स्यात्सोम-
सूर्ययोः। लक्षेर्मुट् च। लक्ष्मीः॥ ॥इत्युणादिषु तृतीयः पादः॥ ॥वातप्रमीः। वातशब्दे उप-
पदे माधातोरीप्रत्ययः स च कित्। वातप्रमीः। अयं स्त्रीपुंसयोः। ऋतन्यंजिवन्यंज्यर्पिमद्य-
त्यंगिकुयुकृशिभ्यः कत्निच् यतुजलिजिष्णुच् इसन् स्यन् इथिन् उलि असस् आनुकः। द्वादशभ्यः

कमाम्नुः। ऽस्तेः कलिच्। यया। बद्धमुष्टिः करो रत्निः सो रत्निः प्रसृतांगुलिः। तनो
तेर्यतुच्। तन्यतुर्वायुः रात्रिश्च। ऽअंजेरलिच्। ऽअंजलिः। वनेरिष्णुच्। वनिष्णुः स्थविरात्रौ।
ऽअंजेरिष्णुच्। ऽअंजिष्णोर्भानुः। ऽसर्पयतेरिसन्। ऽसर्पिः सोयमांसां। मदेः स्यन्। मस्यः। ऽअ
तेरिथिन्। ऽअतिथिः। ऽअंगेरुलिः। ऽअंगुलिः। कौतेरसः। कवसः। ऽअव इत्येके। कववांयो
तेरासः। यवासः। दुरालभा। वृश्चेरान्तुक्। वृश्चान्तुः। ऽशः करन्। उतरस्य त्रेकि ऋहृल्गादि
हककारस्य नेत्वं। शर्करा। पुषः कित्। पुष्करं। कलंश्च। पुष्कलं। गमेरिनिः। गमिष्यतीति राम
गमी। ऽआङि णित्। ऽआगामी। भुवश्च। भावी। प्रे स्थः। प्रस्थायी। परमे कित्। परमेष्ठी।।

मंथः। मंथतेरिति निः। किस्यात्। कित्वान्नकारलोपः। मंथाः। मंथानौ। पतस्तु वा पंथाः।
पंथानौ। खजेरकः। खजाकः पक्षी। बलाकादयश्च। बलाका। शलाका। पताका। पि
नाकादयश्च। पातेरित्वं नुम्वा। क्लीबपुंसोः पिनाकः स्यात् शूलशंकरधन्वनोः। तड
आघाते। तडाकः। कषिदूषिभ्यां मीकन्। कषीका पक्षिजातिः। दूषीका नेत्रयोर्मलं। स्य
निहृषिभ्यां किच्च। स्यनीकं। हृणीकं। वंकणः कंकणं वा। कणशब्दे। अस्माद्घञ्। तुगंतादी
कन्धातोः। कंकणादेश्च। घंटिकायां कंकणीका सेवप्रतिसरापि वा। शृपृवृणां द्वे रुक्चा
भ्यासस्य। शर्शरीको हिंस्रः। पर्परीको दिवाकरः। वर्वरीकः कुटिलकेशः। पर्फरीकाद

यथा। स्फुरस्फुरणे। अस्मादीकन्। धातोः पर्फादेशः। पर्फरीकं किसलयं। द
र्दरीकं वादित्रं। झर्झरीकं शरीरं। तित्तिडीको वृक्षभेदः। वरेर्नुम्च। वंवरीको भ्रमरः।
मर्मरीको हीनजनः। कर्करीका गलंतिका। पुणतेः पुंडरीकं। पुंडरीको व्याघ्रोऽग्नि
र्दिग्गजश्च। दबेः किद्ध्रस्वश्च। दबीका शलाका। सजेश्च। सजीक उपहतः। सर्त्तेर्नुम्च।
सृणीका लाला। मृडः कीकङ्कणौ। मृडीको मृगः। मृडङ्कणः शिशुः। अलीकादय
श्च। कीकजन्ता निपात्यंते। अलभूषणादौ। अलीकं मिथ्या। विपूर्वात् व्यलीकं विप्रि
यं खेदश्च। वलीकं पटलप्रांते इत्यादि। कृतृभ्यामीषन्। करीषोऽस्त्री शुष्कगोम

यो। तरीषः तरीता। स्वर्द्र्याकिल्बि। शिरीषः। पुरीषं। सर्जे सर्जरवा। ऋजीषं पिष्टप
चनं। अंबरीषः। अयं निपात्यते। अविशाष्टे। अंबरीषः पुमान् भ्राष्ट्रो। अम्बरस्तु क्ली
बेऽबरीषं भ्राष्ट्रो ना। कृ स्वृ कटिपटि शौटिभ्य ईरन्। करीषो वंशांकुरः। शारीशं परी
रंफलं। करीरः कंटरोजपनदेशष्च। पटीर स्यंदनः कंटकः कामष्च। शौटीरस्त्यागिवी
रयोः। आह्लादित्वात् ष्वष्टू। शौटीर्यं। वष्टौंकित्। उशीरं। कशेरुर्द्ध। कश्मीरो देशः। र
मञ्च। कुरीरं मैथुनं। पसेः किञ्च। क्षीरं। गभीरगंभीरो। गमेर्भः पञ्चेनुम्च। विषावि
हा। स्यतेर्जहाते श्ववि र्वाभ्यामाप्रत्ययः। विषाबुद्धिः विहास्वर्गः। अव्यये इमे। पव

सि॰ कौ॰ उ॰ सू॰
२४१

रजिमत्तूापवेसिमोवह्निरश्म्योः। शीतोष्णुकूलकवलत्रवालनः। चत्वारः प्रत्ययाः स्युः।
शीधुमधां। शीलं स्वभावः। शैवलः। शेवालं। बाकुलकादस्यपोपि। शेवालं शैवलो नस्त्री शे
पालो नलनीलिका। मृकलिभ्याम् कोकलगे। मत्कूको मृगः। कारूकः कारुकः। चलेरूकः। चल
कः। पक्षी उत्पतनम् लंबा। उलूकादयश्चावलेः संप्रसारणमूकश्चाउलूकाविंदपेचको।
वावदूको वक्ता। मत्कुणः। शमेर्बुक्। शंबूको न ल स्तुक्तिः। शाजिमंडिभ्यामकलः। शालूकं।
कंदविशेषः। मंडूकः। नियोमिः। नेमिः। ऊर्मीरूत्वाऊर्मिः। भुवःकित्। भूमिः। अश्मोतेरश्व।
रश्मिः किरणो रज्जुश्च। दल्मिः। दलवि शरणो। दल्मि दिंद्रायुधं वा। वीज्यादवरिभ्योमिः। बाकुल राम

७२

काम्रत्वं। वेणिः स्यात्केशविन्यासः प्रवेणी वस्त्रियामुभे। ज्यानिः। जूर्णिः। सृवृषिभ्यां कित्।
सृणिः अंकुशः। वृष्णिः क्षत्रियमेषयोः। अंगेर्नलोपश्च। अग्निः। वहिश्रिश्रुयुद्रुग्लाहात्वरि
भ्यो नित्। वह्निः। श्रेणिः। श्रोणिः। योनिः। द्रोणिः। ग्लानिः। हानिः। तूर्णिः। वाङ्कुलेकात्। म्लानिः।
घृणिः पृश्निः पार्ष्णिश्चूर्णिर्भूर्णिः। एते पंच निपात्यंते। घृणिः किरणः। स्पृशतेः सलोपः। पृश्नि
रल्पशरीरः। पृषेर्वृद्धिश्च। पार्ष्णिः पादपृष्ठं। चरेरूपध्याया उत्वं। चूर्णिः कपर्दकशतं। वि
भर्तेरूत्वं। भूर्णिर्धरणी। वृदृभ्यां विन्। वर्विर्घस्मरः। दर्विः। जॄशॄस्तॄजागृभ्यः क्विन्। जीर्विः
पशुः। शीर्विः हिंस्रः। स्तीर्विरध्वर्युः। जागृविर्नृपः। दिवो द्वे दीर्घश्चाभ्यासस्य। दीदिविः स्वर्गभ

शयोः। क्रुवि घष्टि छुवि स्छवि विकि कीदिवि। क्रुवि स्तं तु वायद्रव्यं। घष्टिर्व राहः। छवास्छार्द्र
स्वत्वं वा छुविः। दाप्तिः। स्छवि स्तं तु वायः। दीव्यते। किकीपूर्वात्। किकीदिविस्त्वाषः। बाकुल
काद्भुस्व दार्घयोर्वि नियमः। वाषेण किकिदीविना। पातेर्डतिः। पतिः। शके र्डतिर्न्नु। शकृत्।
अमेरतिः। अमतिः कालः। वहिवस्यर्त्तिभ्यश्चित्। वहतिः पवनः। वसतिर्गेहं। हँसि न्योः। अर
तिः क्रोधः। अंबेः कोवा। अंकतिः। अंबतिः बातः। हंते रंहृवा। हंतेरतिः। स्याद्रंहादेशश्च धातोः।
हंति दुरितमनया। अंहतिः दानं। प्रादेशनं निर्वपणमपवर्जनमंहतिः। रमेर्नित्। रमतिः का
जकामयोः। सृडुः। क्रिः। सृदिः। अदिशदि भूशुभिभ्यः क्रिन्। अद्रिः। शद्रिः। शर्करा। भूरिद्म

वुदं। सुभ्रिर्ब्रह्मा। वं ऋषाद्यस्या। क्रिन्नं तानि पान्त्यंते। वंक्रिर्वघ्मेदः। गृहदारूपार्श्वास्थि
वावप्रिः। क्षेत्रं। अंह्रिः अंघ्रिश्चरणः। तदिः सौत्रो धातुः। तंद्रिर्मोहः। बाकुलकाहुणः। मेदिः।
रामादिभ्यां त्रिप्। रात्रिः। शात्रिः कुंजरः। अदेश्किनिश्चा। बात्रिप्। अत्त्री। अत्रिणो। अत्रिणः।
अत्रिः। अत्री। अत्रयः। पतेरत्रिन्। पतत्रिः पक्षी। मृकणिभ्यामीचिः। मरीचिः। कणीचिः। प
ध्वी निनादश्च। पयतेश्चित्। अहनिभ्यामूषन्। अरूषः सूर्यः। हनूषो राक्षसः। पुरः
कुषन्। पुर अग्रगमने। पुरुषः। अन्येषामपीति दीर्घः। पूरुषः। पृनहिकलिभ्य उष
च्। परुषं। नहुषः। कलुषं। पायेरूषन्। पीयदिति सौत्रो धातुः। पीयूषं। बाकुलकाहुणे पे

शि॰ कौ॰ उ॰ वृ॰
२४९

पूयोभिनवं पयः। मस्ते तुम्बा। मंजूषा। गंडे म्बा। गंडूषः गंडूषा। अर्त्तेररुः। अररुः श
त्रुः। अररुः। आररवः। कुटः किंबा। कुटरुः वस्त्रगृहं। किल प्रयोजनं वित्यां। कादिभ्यो
ऽटन्। कटो स्त्रियां। ककिर्गत्यर्थः। कंकटः सन्नाहः। देवटः शिल्पी। करटः इत्यादि।
कुकदिकडिकटिभ्योऽम्बच्। करंबं व्यामिश्रं। कदि कडी सौत्रौ। कदंबो वृक्षभेदः। कडं
बोऽग्रभागः। कटंबो वादित्रं। कदेर्णित्संज्ञिणि। कादंबः कलहंसः। कलिकर्पोरमः। क
लमः। कर्दमः। कुणिपुल्योः किंदच्। कुणशब्दे पकरणयोः। कुणिंदः शब्दः। पुलिंदो जा
तिविशेषः। कुपेर्वा वच। कुपिन्द कुविंदौ तंतुवाये। नौ षंजेर्घथिन्। निषंगथिः आलिं

राम
७४

गकः। उपचैत्रैश्चित्रा। उदरथिः समुद्रः। सत्रैर्लिङ्गं। सारथिः। खर्जूरपिंजादिभ्य ऊरोलचौ।
खर्जूरः। कर्पूरः। वल्लूरं शुष्कमांसं। पिंजूलं कुशवर्त्तिः। लंगेर्वृद्धिश्च। लांगूलं। कुसूलः।
कुवयटूरीर्घश्च। कूवी चित्रलेखनिका। समीणः। समीवः समुद्रः। समीरी हरिणी। सिवे
टेरूच्च। स्तवोदर्भांकुरः। स्तवी। ग्रामेर्वन्नः। ग्रंबो मुसलं। उल्वादयश्च। उल्वन्नेतानि पात्यंते। उल्व
समवाये। वस्यलत्वं। गुल्मं भावश्च। उल्वं गर्भाशयः। गुल्वं ताम्रं। बिंबां। स्तोऽम्बजवकौ। ति
ष्ठतेः अंबष्ठ। अवकएतोस्तः स्तादेश्च। स्तंबो गुच्छः स्तंबेरमादिनः। स्तबकः। गुच्छगुच्छः। शाशा
पिभ्यां ददनौ। शादो जंबालं शष्पयोः। शब्दः। अब्ददयश्च। अवतीत्यब्दः। कौतेर्नुम्। कुंदः। बलि

सि०कौ०उ०कृ०
२५०

मजित निभ्यः कयन्।वलयं।मलयः।तनयः।वृक्षेः क्षुरा दुकौवा।वृषयः।अग्रयः।हृ
दयं।मिपीभ्यां रुः।मेरुः।पेरुः सूर्यः।बाहुलकात्पिबतेरपि।संवत्सर वपुः पारुः पेरु वा
सोर्दिन प्रणीः।जत्वादयश्च।जत्रु।जत्रुणी।अश्रु।अश्रुणी।रुशातिभ्यां कुन्।रुरुर्मृग
भेदः।शातयतीति शत्रुः।प्रज्ञादेः पाठाद्ध्रस्वत्वं।जनिदाच्युसृवृमदिषमिनमिभृञ्भ्यस्त्व
न्त्वन्त्वनिन्क्विनुश्कुस्यट्डउरटटवः।जनित्वौ मातापितरौ।दात्वः।दाता।च्योत्नः।गंता।अ
र्जः।क्षोणिः पुण्यश्च।सरणिः।अंकुशः।खंडः।सृण्योः वायुश्च।वृक्षः।आर्द्रकं।मूलकं।वामस्यः।षं
ढः।डित्वाट्टिलोपः।नमतीति नटः।भैरवः।बिभर्ति भरटः।कुलालोऽभृतकश्च।अन्येभ्यो

राम
७५

पि दृश्यंते। पेत्वममरतां। मृष्टशं। कुसेरुं। भोमेदेताः। कुसुंभं। कुसुमं। कुसीदं। कुसितो जनप
दः। स्नानसिवर्ल्सिवर्ल्सितंडुलो। कुशाववाले। च्वलपच्वलेध्रिस्य शच्योः। सनोतेरसिप्र
त्ययस्तपश्चादृद्धिः। स्नानसिर्हिरण्यं। वृश्नोतुश्को। वर्णसिर्जलो। पृ। पर्णसिर्जगरे लेहः। तडुआपा
ते। तंडुलाः। अकिलक्षणे। उरन्नु। अंकुशः। वर्षेशः लेः। वल्वलो। मूलपकट्कः। इच्वलः। दैत्यभे
दः। पच्वलं। भिद्धृषा सकारस्य इकारः। धिस्यश लेर्यः। शच्वं वा पुंसि। शकुर्नी। मृडुः। श
कविभ्यः कुः। मूलं। शकुः। प्रियंवदो। अंस्रौरसः। बाकुलकादमेः। अमृतः। माछासस्मियो
यः। मायाः। छाया। सस्यं। वाकुलकासुनोतेः। सव्यं दक्षिणवामयोः। जनेर्यक्। ये विभाषा। जन्यं

युडं। जाया भार्या। अघ्न्या रथ्याय गं तानि पात्यंते। हंतेर्यक्। अडागमः उपधालोपश्च।
अघ्न्या माहेयी। अघ्न्यः प्रजापतिः। कनी दीप्तौ। कन्या। वबयोरैक्यं। वंध्या। स्नामदिपद्य
र्त्तिपृशकिभ्यो वनिप्। स्नावा रस्निकः। मद्वा शिवः। पद्वा पंथाः। अर्वा तुरगगर्ह्ययोः। पर्वग्रं
थिः प्रस्तावश्च। शक्वा हस्ती। द्रा द्वौ। शक्वरी अंगुलिः। धीङ् कुपि रुहि जिक्षि सृध्वंभ्यः क्वनिप्।
धीवा। अजगरः। कुष्वा सृगालः। रुक्वा वृक्षः। जित्वा जयी। क्षित्वा वायुः। सृत्वा प्रजाप
तिः। ध्वत्वा विष्णुः। ध्याप्योः संप्रसारणं च। धीवा कर्मकरः। पीवा स्थूलः। अदेर्द्वो वा अ
द्वा। पर्द्वर शब्दो स्तुद्व। प्रेत्वा प्रशस्ताव सागरः। प्रत्वरी प्रशस्तवरी च नदी। सर्वधातुभ्यश्च

राम
७६

नूः। पविरश्मिः। तुडिः। तुंडिः। वलिः। वटिः। यजिः। देवयजिः। काशन्त इति काशिः। यतिः। म
स्त्रिः। मन्त्री। केलिः। मसी परिणामे। मसिः। बाहुलकात् कुणिः। कोटिः। हेलिः। बोधिः। नंदिः।
कलिः। हृपिषिरुहिवृतिविदिछिदिकीर्त्तिभ्यश्च। हरिर्विष्णावहाविंद्रे भेके सिंहे हये रवौ।
चंद्रे कीले प्लवंगे च यमे वाते च कीर्त्तितः। पेषिर्वज्रं। रोहिर्व्रीती। वर्त्तिः। वेदिः। छेदिः। छिन्ना।
कीर्त्तिः। इगुपधात्कित्। कृषिः। ऋषिः। शुचिः। लिपिः। बाहुलकाद् ह्रस्वो। लिविः। तृणानि
घृषेः। तूलिः। तूला। तूर्विका। भ्रमेः संप्रसारणं च। भृमिः। वातः। बाहुलकाद् भ्रमिः। क्रमि
तमिशातिभ्यः स्वं भामत इत्। क्रिमिः। संप्रसारणानुवृत्तेः। कृमिरपि। तिमिः। मत्स्यभेदः। शि

ति मेर्वकस्तुक्कयोः॥ स्तिमिः समुद्रः। मने रुच्च। मुनिः। वर्णेर्वलिश्चाहिरण्ये। वर्णिः सौत्रः।
अस्य वलिरादेशः। करो पहारयोः पुंसि बलिः प्राण्यंगे स्त्रियां। हिरण्ये तु वर्णिः सुव
र्णं। वसिवपियजिराजिव्रजिसदिहनिवाशिवादिवारिभ्य इञ्। वासिश्छेदनवस्तुनि।
वापिः। वापी। याजिर्यष्टा। राजिः। राजी। व्राजिर्वनाजिः। सादिः सारथिः। निघातिर्लोहघा
तिनी। वाशिरग्निः। वादिर्विद्वान्। वारिर्गजबंधनी। जले तु क्लीबं। बाहुलकाद्वारिः पथिक
संहतौ। नहे भश्च। नाभिः स्यात्क्षत्रिये पुंसि। प्राण्यंगे तु स्त्रियां। पुंस्यपीति केचित्। कृषे
र्वृद्धिश्छंदसि। कार्षिः। श्रः शकुनौ। शारिः शारिका। कृञ उदीचां कारुषु। कारिः शिल्पी। ज

निपसिभ्यामिण्॥ नि निर्जनं नीपाः सिभिक्ष्यी॥ अग्निश्च॥ अज्यतिभ्यां वा॥ आजिः संग्रामः॥ आ
तिः पक्षी॥ पादे चा॥ पदाजिः पदातिः॥ अशिपणाय्योरुडायलुकौ च॥ अशेरुडा॥ राशिः॥ पुंजः॥
पणायतेरायलुक् च॥ पाणिः करः॥ वातेर्डिच्च॥ विः पक्षी॥ स्त्रियां वा॥ त्यपि॥ प्रेहरतेः कूपे॥ प्र
हिः कूपः॥ नौ व्यो यलोपः पूर्वस्य च दीर्घः॥ व्येञ इण् स्याद्यलोपश्च नेर्दीर्घः॥ नीविः॥ नी
वी॥ स्मादिण् स्यात् स वद्धि ख्य यलोपश्च समानस्य स दत्तः स इत्यादेशश्च॥ समानं ख्या
यते जनैरिति सखा॥ आङि श्रिहनिभ्यां ह्रस्वश्च॥ आङ इण् स्यात् स वड्डित्॥ आङो ह्रस्वश्च॥ अश्रि
यः पाल्यश्रिकोटयः॥ सर्पे वज्रासुरेष्वहिः॥ अच इः॥ रविः॥ पविः॥ रवनिः॥ कापिर्हसः॥ अग्निः॥

तरिः॥ कविः॥ अरिः॥ अजिः॥ खनिकष्यज्यसिवसिवनिसनिध्वनिग्रंथिचरिभ्यो॥ १

क्षि॰ कौ॰ उ॰ ष॰
२५३

असिः। वसिर्वस्त्रं। वनिरग्निः। सनिर्भक्तिर्दानं वा। ध्वनिः। ग्रंथिः। बलिः पशुः। एते छंदसि। व
र्त्तिः। मुजेः कित्। भुजिः। कृगृशृपृकुटिभिदिछिदिभ्यश्च। इः किंस्यात्। किर्वराहः। गिरिर्गोत्रा
क्षिरोगयोः। गिरिणा काणः। गिरिकाणः। शिरिः शलभः। हंता वा। पुरिर्नगरं राजा नदी वा। कु
टिः शालाशरीरं वा। भिदिर्वज्रं। छिदिः परशुः। कुडिकंप्योर्नलोपश्च। कुडिर्दाहः। कुडिर्देहः।
कपिः। सर्वधातुभ्यो मनिन्। क्रियत इति कर्म। भस्म। जन्म। शर्म। स्थाम। बलं। दस्मन्निति
ह्रस्वः। छद्म। सुत्रामा। बृंहेर्नोऽच्च। नकारस्याकारः। ब्रह्म तत्त्वं तपो वेदः। ब्रह्मा विप्रः प्रजा
पतिः। अणिशकिभ्यां छंदसि। अश्मा। शक्मा। हृभृधृसृस्तृशृभ्य इमनिच्। हरिमा कालः।
भरिमा कुटुंबं। धरिमा रूपं। सरिमा वायुः। स्तरिमा तल्पं। शरिमा प्रसवः। जनिमृङ्भ्या
मिमनिन्। जनिमा जन्म। मरिमा मृत्युः। वेञः सर्वत्र। छंदसि भाषायां च

राम
१८

स्यर्थः। वेमा। तंतु। वायदंडः। अईवादिः। सामनी वेमनी इतिवृत्तिः। नामन्सीमन्व्योमन्
रोमन्लोमन्पाप्मन्ध्यामन्। सप्त अमी निपात्यंते। म्नायते नेनेति नाम। सिनोतेर्दी
र्घः। सीमा। सीमानौ। सीमानः। पक्षे डाप्। सीमे। सीमाः। व्ये अः अंत्यस्यो त्वं गुणः। व्योम।
रौतेः। रोम। लोम। पा प्मा पाप्मं। ध्यामा परिमाणं ते अस्व। मिथुने मनिः। उपसर्गक्रिया सं
बद्धं मिथुनं। स्वरार्थमिदं। सुशर्मा। सातिभ्यां मनिन्मनिणौ। स्यति साम। सामनी। आ
त्मा। हनिमशिभ्यां सिकन्। हंसिका। हंसयोषिति। मशिका। कोरदन्। कबरः। गिरड्डन्।
गरुडः। दृदेः कपिर्न लोपश्च। दृदं। कायतेर्डिमिः। किम्। सर्वधातुभ्यः ष्ट्रन्। वस्त्रं। अस्त्रं।

लिं॰कौ॰उ॰कृ॰
२५४

शस्त्रं।शास्त्रं।इत्यमन्त्रिनितिकृत्स्वत्वं।छादनाद्युत्रं।चलिजिगमिनमिहनिविश्वशां वद्धित्रं।भ्रा
ष्ट्रः।गोत्रं।शाकटं।नोत्रं स्तोत्रं।हेत्रं मरण्यं।वैक्षुं।-शाक्रूमाकाशं।दिवेर्युत्रं।घोत्रं।ज्योतिः।
उषित्रवनिभ्यां कित् त्रं।भक्षुः।रवात्रं।खनित्रं नजोघाटरत्रं।सिविमुच्योदेरू त्रं।सत्रं।सू
त्रं।-असिविमिदिशसिभ्यः क्रंः।-शोत्रं।वित्रं।मित्रं।शस्त्रं।पुवोदृस्वत्रं।पुत्रः।स्थायतेर्दु
द्रः।स्त्री।गत्वदीपविवविधयमिसदिक्षदिभ्यस्त्रः।गोत्रं स्या-त्नाम वंशयोः।गोत्रापृथिवी।
धत्रं।गृहं।वेत्रं।पत्रं।वक्त्रं।यंत्रं।सत्रं।क्षत्रं।कुयामाशुभसिभ्यस्त्रन्।होत्रं।यात्रा।मात्रा।
श्रोत्रं।भस्त्रा।गमेरावा।गात्रं।दादिभ्य ष्ठं।दंष्ट्रा।दात्रं।पात्रं।नक्षत्रादिगन्ध्यो इति त्रन्।भावि

राम
७९

त्रं। वादित्रं। गादित्र मोदनं। वरे ईतो। वादित्रं। अशित्रादिभ्य इत्रोत्रौ। अशित्रं। वहित्रं।
धरित्री मही। त्रैङ्। एवमादिभ्यष्ट्रत्रः। श्रोत्रं प्रहरणं। वञ्। वस्त्रं प्रावरणं। अमेर्द्विष
ति वित्। अमित्रः शत्रुः। अंशाः समिणेर्निकषिभ्यां। संपूर्वादिणः निपूर्वात्कषेश्चाः स्या
त्। स्वरादित्वादव्ययत्वं। समया। निकषा। वितेः कणः कश्च। बाकुजकादयुणः। विक
णं मसृणं स्निग्धं। सूवेः स्मन्। सूक्ष्मं। पातेर्डुमसुन्। पुमान्। रुचिविभुजिभ्यां किष्मन्। रुचि
ष्यमिषं। भुजिष्यो दासः। वसेस्तिः। वस्तिर्नाभेरधो द्वयोः। वस्तपः स्तुर्दशास्त्रे। बाकुल
कालुसः। शास्तिः राजदंडः। विंध्याख्यमगमस्यतीति अगस्तिः। शकंध्वादिः। सावसेः। स्व

स्तिः। स्वरादित्वादव्ययत्वं। वीतसेः। वितस्तिः। पदिप्रथिभ्यां नित्। पित्तिः। प्रथितिः। तितुत्रेष
ग्रहादीनामितीट्। दृणातेर्ह्रस्वश्च। दृतिः। कृतॄकृपिभ्यः कीटन्। किरीटं। तिरीटं। सुवर्णशि
रोवेष्टनं। कृपीटं कुत्सितवारिणोः। रुचिवचिकुचिकुटिभ्यः कितच्। रुचितं मिष्टं। उचितं।
कुचितं। परिमितं। कुटितं। कुटिलं। कुटिकुषिभ्यां क्मलन्। कुट्मलं। कुष्मलं। कुषेर्लश्च।
कुल्मलं पापं। सर्वधातुभ्योऽसुन्। चेतः। सरः। पयः। सदः। रपेरत एच्च। रेपो वद्यं। अशेर्दे
वने युट् च। देवने स्तुतौ। यशः। उब्जेर्बले बलोपश्च। ओजः। श्वेः संप्रसारणं च। शवः। शवसी। व
लपर्यायौ। श्रयतेः स्वांगे शिरः किच्च। श्रयतेः शिर आदेशः। असुन् किच्च। शिरः। शिरसी।

अर्त्तेरूरुः । ऊरः । व्याप्नोतेर्नुट् । अर्णो गुरुदस्याद्भिः । उदके नुट् । अर्त्तेरसुन् स्यात्तस्य च नुट् ।
अर्णः । अर्णसी । इण आगसि । एनः । दिवेर्जने धिश्च । वाश्रस्य यस्य नुट् घित्वा कुत्वं । देकरः ।
सुवर्णे । वायते रत्ने ह्रस्वश्च । वनो भस्के । व्ह्रः । धीङः भ्यां रूपस्वाङ्ग योः पुट् । वर्पो रूपं । शेपो
गुह्ये । स्तुरीभ्यां तुट् । स्तोतः । रेतः । पातेर्बले जुट् । पाजः । पाजसी । उदके थुट् । पाथः । अन्नेव ।
पाथो भक्तं । अदेर्नुम् धौ च । अदेर्भक्ते वा ध्येः । सुनन् नुमागमो ध्यादेशश्च । अंधो ऽन्नं । स्कन्देश्च
स्वाङ्गे । स्कन्धः । स्कन्धसी । आपः कर्माख्यायां ह्रस्वो नुट् च वा । अप्नः । अपः । बाहुले कारणे यः । आ
पसी । रूपे जुट् । अप्नो रूपं । उदके नुम् भौ च । अंभः । नहेर्दिवि भश्च । नभः । इण आगः । अप

सिं० कौ० उ० कृ०
२५६

राधेर्वा। आगः पापापराधयोः। अमेर्हुक् च। अंहः। रमेश्च। रंहः। देशे ह्वा। रमंते ऽस्मि
न् रहः। अंव्यंजियुजिभजिभ्यः कुश्च। एभ्योऽसुन् कवर्गश्चांतादेशः। अंकश्चिह्नशरी
रयोः। अंगः पक्षी। योगः समाधिः। भर्गस्तेजः। भूरंजिभ्यां कित्। भुवः। रजः। वसेर्णित्।
वासो वस्त्रं। वंदेरादेश्च छः। छंदः। पचिवचिभ्यां सुट् च। पक्षसी तु स्रुतो पक्षौ। वक्षो हृद
यं। वहिहाधाञ्भ्यश्छंदसि। वक्षाः। अनड्वान्। हासाश्चंद्रः। धासाः पर्वत इति प्रांचः।
वस्तुतस्तु णिदित्यनुवर्तते न तु सुट्। तेन वहे रूपव्यावद्धिः। इतरयो रातो युगिति युक्।
श्यो ण स्कन्द वाहसा। श्रोता हवं गत एत स्तोमवाहः। विधो विहायाः। वाजं भरो विह

राम
८१

याः। देवो नयः पृथिवीं विश्वधायाः। ऽस्य धारयत् पृथिवीं विश्वधायसं। धर्णसिं भरि
धाय समित्यादि। दण्डधाः। सिः। अयावङ्गिः। स्वरादिपाठादव्ययत्वं। मिथुनेः। सिः पूर्वव
त्सर्वं। उपसर्गविशिष्टोधातुर्मिथुनं। तत्रासुनोऽपवादोऽसिः। स्वरार्थः। नञिहन्नेहन्वा
अनेहा। अनेहसौ। विधाञोवेधश्च। विदधातीति वेधाः। नुवोधुट्च। नोधाः। गतिकारक
योः पूर्वपदप्रकृतिस्वरत्वं च। असिः स्यात्। सुतपाः। जातवेदाः। गतिकारकोपपदात्कृ
दित्युत्तरपदप्रकृतिस्वरत्वे सति शेषस्यानुदात्तत्वे प्राप्ते तदपवादार्थमिदं। चन्द्रेमोडि
त्। चन्द्रोपपदान्माङोऽसिः स्यात्स च डित्। चन्द्रमाः। वयसि धाञः। वयोधाः। स्त्रकूलः। पय

सि॰कौ॰उ॰रू॰
२५१

स्निवा। पयोष्णाः समुद्रो मेघश्च। पुरसिवा। पुरोष्णाः। पुरूरवाः। पुरुशब्दस्य दीर्घो द्यौते इसि
श्च निपात्यते। चक्षेर्बहुलं शिच्च। नृचक्षाः। उषः किच्च। उषः। दमेरुनसि। सप्ताविर्दमुनाः।
अंगिरः। अंगते इसि इरुडागमश्च। अप्सराः। सर्तेरप्पूर्वादसिः। प्रायेणायं भूम्नि। अ
प्सरसः। विदिभुजिभ्यां विश्वे। विश्ववेदाः। विश्वभोजाः। वशेः कनसि। संप्रसारणं। उश
ना॥ ॥इत्युणादिषु चतुर्थः पादः॥ ॥अदिभुवोर्डुतच्। अद्भुतं। गुधेरूमः। गोधू
मः। मसेरूरन्। मसूरः। प्रथमे पादे असेरुरन् मसेश्चेत्यत्र व्याख्यातः। स्थः किच्च। स्थू राम
रः। मनुष्यः। पातेरतिः। पातिः। स्वामी। संपातिः पक्षिराजः। वातेर्नित्। वातिरादित्यसोमे ८२

योः। अर्त्तेश्च। अरतिरुद्वेगः। तृहेः क्नो हलोपश्च। तृणं। वञ्चत्रुदितनिताड्भ्यश्छल
ब्वतंडश्च। व्रियंते लुप्यंते तन्यंते ताड्यंते इति तंडुलाः। दंसेष्टटनौ न आ च। दासः सेवक
स्तद्योः। दंशेश्च। दाशो धीवरः। उदि चेर्डैसिः। स्वरादिपाठादव्ययत्वं। उच्चैः। नौ दीर्घश्च।
नीचैः। सौरमेः क्नो दमे पूर्वपदस्य च दीर्घः। रमेः सु पूर्वाद्रमेर्वा च्ये क्तः स्यात्। किल्वा
दन्तुनासिकलोपः। स्मरतः। उपशांतः। कृपाल्लुश्च। पृ औयक्कुह्रस्वश्च। यत्प्रत्ययः। कुण्यं।
त्वंसेः शिकुट् किच्च। त्वंसतेः शिरादेशः यत्प्रत्ययः कित्तस्य कुडागमश्च। शिक्वं। अर्त्तेः
कुन्नुच्च। ऋरत्ने भेषः। हिंसेरीरन्नीरचौ। हिंसीरो व्याघ्रदुष्टयोः। उदि दृणाते रजलोप

वं पदं स्यज्जोपश्चादुदरं । डिंखवने मुष्टू वोदातः । अवू अतरवडिश्याद्रानोमुष्टू सवोदा
तः । मुखं । अमेः सनू । अंसः मुहेः स्वोमूर्वा । मरखः । नहेर्हजोपश्चा नखः । श्रीज्रो ह्रस्व
स्या प्रिखामाडः अखोमयवा । मपरखः । कलिंगलिभ्यांपक गस्यो ब्रा । कुंत्सुः शरीराव
यवो रोग स्वा गुल्फः पादग्रंथिः । स्पशेः घटएस्तु नौ घ्रवा । घटएस्तु नौ प्रत्ययो ष्टदस्या
देश्रः । पार्श्वौ स्त्री कक्षयो रधः । पर्शुरा पुष्पं । श्मनिश्चयतेडुन्ना श्मनू राष्ट्रेमुखवावा । पु
खमा श्रयत दृतिश्मश्रु । अश्वादयश्वा । अश्रु नयनजं । जनेष्टनू जोपश्वा जटा । अ
वृतस्यजंघवा तस्यजनेः जंघादेश्रः स्यादज्ञा । जंघा । हंतेश्चरा रावयवेद्धेवा । जघनं । प

व्याप्तितं वल्मीकं घाः। क्लीबे तु जघनं पुरः। क्लिशेरन्लोलोपश्च। लकारस्य लोपः। के
शः। फलेरितजादेश्च पः। पलितं। कृञादिभ्यः संज्ञायां वुन्। करकः। करका। कटकः। कन
कः। नरको नारकोऽपि चेति द्विरूपकोषः। सरकं गगनं। कोरकः। कोरकं च। चीकयतेराद्यं
तविपर्ययश्च। कीचको वंशभेदः। पचिमच्योरिच्चोपधायाः। पेचकः। मेचकः। जनेररष्
चा। जठरं। वचिमनिभ्यां चिच्च। वठरो मूर्खः। मठरो मुनिशौंडयोः। विदादित्वान्माठरः। ग
र्गादित्वान्माठर्यः। ऊर्जिदृणातेरलचौ पूर्वपदान्त्यलोपश्च। ऊर्दरः शूररक्षसोः। कदरा
दयश्च। कुदरः कुसूलः। मृदरं विलसत्। सूदरः सर्पः। हंतेर्घुन्नाद्यंतयोर्घत्वतत्वे वा घ

तनोमारकः। कमिगमिक्षमिभ्यस्तुन्वृद्धिश्च। कांतुः। पक्षी। गांतुः पथिकः। क्षांतुर्मशकः।
हर्यतेः कन्यन्हिरश्च। कन्यन्प्रत्ययः। हिरण्यं। कृञः पासः। कर्पासः। बिल्वादित्वात्कार्पासं।
वस्त्रं। जनेस्तुरश्च। जर्तुः हस्ती। योनिश्च। उर्णोतेर्डुः। ऊर्णा। दधातेर्यन्नुट् च। धान्यं। जीर्यतेः क्रि
न्रश्च वः। जिव्रिः स्यात्कालपक्षिणोः। बाहुलकाद्दुलिवेति दीर्घो न। मव्यतेर्यलोपो मश्चा
पतुट् च। जः। मव्यते रज्नः प्रत्ययः स्यात्तस्यापतुडागमः। धातोर्यलोपः मकारस्यांत्यस्य
ममाप्तताज्ञो विषये। सडेः कीकन्। सजीकद्रंष्ट्रो धूमश्च। तनोतेर्डउः सन्वच्च। तितउः पुंसि
ज्वौबेवा। अर्भकपृथुकपाका वयसि। सस्तुवक्षो। अतोवुन्भकारश्चांतादेशः। अघेः कुक राम

न्सं प्रसारणं वा। पिबतेः कन्। अवध्या वमा ध्यमा व्रु रेफः कुत्सिते। वदेर्न त्रि यत्। अवद्यं।
अवतेरमः वस्य पक्षे ध्यः। अवमः। अध्मः। अर्तेर्वन्। अर्वा। रिफतेस्तौदादिकात् अः
रेफः। जीराङौ ह्रस्वः पुट् च तरो लोपश्च कुत्सनयोः। तरस्तौ प्रत्ययौ क्रमात्स्तः धातोर्ह्रस्वः
प्रत्ययस्य पुट्। जिह्मं। जिह्मं। रिप्रं कुत्सितं। क्लिशेरीच्चोपधायाः कन् लोपश्च लो नाम्च।
क्लिशेः कन् स्यात् उपधाया ईत्वं लस्य लोपः नामागमश्च। कीनाशः यमः। कि त्वक लं वि
त्यां। अश्नोतेराशुकर्मणि वरट् च। वकारादुपधाया ईत्वं। ईश्वरः। चतेरुरन्। चत्वारः। प्रात
तेररन्। प्रातः। अमेस्तुट् च। अन्तर्मध्यं। दहेर्गो लोपो दश्च नः। गप्रत्ययः धातोरन्त्यस्य लोपः

सि० कौ० उ० पू०
२६०

दकारस्य नकारः। नगः॥ सिचेः संज्ञायां हनुमौ कश्च॥ सिंचतेः कप्रत्ययः हकारादेशः नुम्च स्या
त्॥ सिंहः॥ व्याङि घ्राते स्वजातौ। कप्रत्ययः स्यात्॥ व्याघ्रः॥ हंतेरत्वं घुरच॥ घोरः॥ क्षमेरुपधा
यालोपश्च॥ वादरत्वं॥ क्ष्मा॥ तरतेर्ड्रिः॥ त्रयः॥ त्रीन्॥ ग्रहेरनिः॥ ग्रहणिः॥ ङीष्॥ ग्रहणी॥ व्याघ्रिभे
दः॥ प्रथेरमच्॥ प्रथमः॥ चरेश्च॥ चरमः॥ मंजेरलच्॥ मंजलं॥ ॥इत्युणादौ पंचमः पादः॥ ॥
उणादयो बहुलं॥ एते वर्तमाने संज्ञायां च बहुलं स्युः॥ केचिदविहिता अप्यूह्याः॥ संज्ञा
सु धातुरूपाणि प्रत्ययाश्च ततः परे। कार्याद्विद्यादनुबंधमेत च्छास्त्रमुणादिषु॥ भूते
पि दृश्यंते॥ भविष्यति गम्यादयः॥ दाशगोघ्नौ संप्रदाने॥ एतौ संप्रदाने कारके निपात्येते॥ राम

८५

दाशंतितस्मै दाशः। गांहंतितस्मै गोघ्नोऽतिथिः। भीमादयोऽपादाने। भीमः। भीष्मः। प्रस्कं

दनः। प्रदक्षः। मूर्खः। खलतिः। ताभ्यामन्यत्रोणादयः। संप्रदानपरामर्शार्थं ताभ्यामि

ति। ततोऽसौ भवतितं लुः। वृत्तं तदिति वर्त्म। वरितं तदिति वर्म। तुमुन्ण्वुलौ क्रियायां क्रि

यार्थायां। क्रियार्थायां क्रियायामुपपदे भविष्यत्यर्थे धातोरेतौ स्तः। मांतत्वादव्ययत्वं। कृ

ष्णं द्रष्टुं याति। कृष्णं दर्शको याति। अत्र वासरूपेण तृजादयो न। तुमुन्ण्वुलौ तु केः। समानक

र्तृकेषु तुमुन्। अक्रियार्थोपपदार्थमेतत्। शक धृष ज्ञा ग्ला घट रभ लभ क्रम सह

र्हास्त्यर्थेषु तुमुन्। एषूपपदेषु धातोस्तुमुन् स्यात्। शक्नोति भोक्तुं। एवं धृष्णोत्यादौ।

इच्छार्थेष्वेककर्तृकेषूपपदेषु धातोस्तुमुन् स्यात्। इच्छति भोक्तुं। वष्टि वांछति वा। २

सि० कौ० उ० कृ०

२५१

अर्थग्रहणमस्मिन्नेव संबध्यते। अनंतरत्वात्। अस्ति भवति विद्यते वा भोक्तुं। पर्याप्तिव
वनेष्वलमर्थेषु। पर्याप्तिः पूर्णता। तद्वाचिषु सामर्थ्यवचनेषूपपदेषु तुमुन्स्यात्। पर्या
प्तो भोक्तुं प्रवीणः। कुशलः पटुरित्यादि। पर्याप्तिवचनेषु किं। अलं कृत्वा। अलमर्थेषु
किं। पर्याप्तं भुङ्क्ते। प्रभूतं तेन गम्यते न तु भोक्तुः सामर्थ्यं। कालसमयवेलासु तुमुन्। प
र्यायोपादानमर्थोपलक्षणार्थं। कालार्थेषूपपदेषु तुमुन्स्यात्। कालः समयो वेला
अनेहा वा भोक्तुं। प्रैषादिग्रहणमिह नानुवर्त्तते। तेनेह न। भूतानि कालः पचतीति वार्त्ता।
भाववचनाश्च। भाववचनाश्चेत्यधिकृत्य वक्ष्यमाणाः प्रत्ययाः। क्रियार्थायां क्रियायां भविष्य

राम

८५

तिस्थुः। याग्ता यया ति। अए कर्म लि वा। कर्मएयुपपदे क्रियार्थायां कि यायां वा एरु स्यात्॥
एगुलोपवादः। कांडुलावोव्रजति। परत्वादयं कादौ न्वा धते। कंबलं दायोव्रजति। परुरुजवि
ग्रास्य शो घञ्। भविष्यतीति निवृत्तं। पद्यते। सो पाकः। रुजतीति रोगः। विशतीति वेशः। स्पृ
शतीति स्पर्शः। स्थिरे। स्थतिष्ठति मवि भक्तिकं। सर्त्तेः स्थिरे कर्त्तरि घञ् स्यात्॥ सरति कालां
तरमिति सारः। व्याधिमस्त्य बलेषु वेति वाच्यं। अतीसारो व्याधिः। अंतर्भावितएयर्थो
त्र सरतिः। रुधिरस्य दिक् मति एये न सारयतीत्यर्थः। विसारोमस्यः। सारो बलं। भावे
सिद्धावस्थापन्ने धात्वर्थे वाच्ये धातोर्घञ् स्यात्॥ पाकः। पाकौ। स्पुरति स्पुलत्योर्घञि।

सि॰ कौ॰ उ॰ कृ॰
२६२

एच अशात्स्यात्॥ स्पारः। स्फावः। उपसर्गस्य घञीति दीर्घः। परीहारः। इकः का
शे। काशे उपपदे इगंतस्यैव प्रादेर्दीर्घः। नीकाशः। अनूकाशः। इकः किम्। प्र
काशः। नोदात्तोपदेशेति न वृद्धिः। शमः। आचमादेस्तु। आचामः। कामः। वा
मः। विश्राम इति त्वपाणिनीयम्॥ स्यदो जवे। अथ घञि नलोपो वृद्ध्य
भावश्च निपात्यते। स्यदो वेगः। अन्यत्र स्यंदः। अवोदैधौद्मप्रश्रथहिमश्रथाः।
अवोदः। अवक्लेदनं। एधः। इंधनं। ओद्मः। उंदनं। श्रंथेर्नलोपो वृद्ध्यभाव
श्च। अकर्तरि च कारके संज्ञायाम्। कर्तृभिन्ने कारके घञ् स्यात्॥ घञि च

राम
८१

भावकरणयोः। रंजेर्नलोपः स्यात्। रागः। अनयोः किं। रंजत्यस्मिन्निति रंगः। प्रास्यते इति प्रा
सः। संज्ञायामिति प्रायिकं। को भवता लाभो लब्धः। इतउत्तरं भावे अकर्त्तरि कारके इति कृ
त्यल्युटो बहुलमिति यावद्द्वयमप्यनुवर्त्तते। परिमाणाख्यायां सर्वेभ्यः। घञ्। अजपोर्बाध
नार्थमिदं। एकस्तंडुलनिश्चायः। द्वौ सूर्पनिष्पावौ। द्वौ कारौ। दारजारौ कर्त्तरि णिलुक् च। दार
यंतीति दाराः। जारयंतीति जाराः। इङश्च। घञ्। अपोपवादः। उपेत्य अस्मादधीयते उपाध्या
यः। अपादाने। स्त्रियामुपसंख्यानं। तदंताच्च वा ङीष्। उपाध्याया। उपाध्यायी। शॄ वायुव
र्णनिवृतेषु। शृ इत्यविभक्तिको निर्देशः। शारो वायुः। करणे घञ्। शारो वर्णः। विचित्रीकरण

श्रिं॰कौ॰उ॰रू॰
२६३

मिति धात्वर्थः। निव्रियते आव्रियतेऽनेनेति निवृतमावरणं। बाहुलकात्करणे क्तः। गो
रिवाकृतनीशारः प्रायेण शिशिरे कृशः। अकृतप्रावरणार्थ्ये घः। उपसर्गे रुवः। प्रस्र
संरावः। उपसर्गे किं। रवः। अभिनिसः स्तनः शब्दसंज्ञायां। अस्मात्स्तनेः सस्य मूर्द्धन्यः।
अभिनिष्टानो वर्णः। शब्दसंज्ञायां किं। अभिनिःस्तनति मृदंगः। समि युद्रुदुवः। संयूय
ते मिश्रीक्रियते गुडादिभिरिति संयावः पिष्टविकारोऽपूपविशेषः। संद्रावः। संदावः।
श्रिणीभुवोऽनुपसर्गे। श्रायः। नायः। भावः। अनुपसर्गे किं। प्रश्रयः। प्रणयः। प्रभवः। कथं
प्रभावो राज्ञ इति। प्रकृष्टो भावः। इति प्रादिसमासः। कथं च न्नो नय इति बाहुलकात्। वौ क्षु

राम
८८

स्रुवः। विश्रावः। विस्रावः। यौ किं। श्रवः। स्रवः। अवोदोर्नियः। अवनायः। अधोनयनं। उन्ना-
यः। ऊर्द्ध्वं नयनं। कथं प्रणयः। उत्प्रेक्षति। बाहुलकात्। प्रे द्रुस्तुस्रुवः। प्रद्रावः। प्रस्तावः। प्रस्रा-
वः। प्रे किं। द्रवः। स्तवः। स्रवः। निरभ्योः पूल्वोः। निष्पूयते शूर्पादिभिरिति निष्पावः। धान्यविशे-
षः। अभिलावः। निरभ्योः किं। पवः। लवः। उन्न्योर्ग्रः। उद्गारः। निगारः। उन्न्योः किं। गरः। कृ
धान्ये। कृ इत्यस्माद्धान्यविषयकात् उन्न्योर्घञ् स्यात्। उत्कारो निकारो धान्यस्य विक्षेप
इत्यर्थः। धान्ये किं। भिक्षोत्करः। पुष्पनिकरः। यज्ञे समि स्तुवः। समेत्य स्तुवंति यस्मिन् देशे
छंदोगाः स देशः संस्तावः। यज्ञे किं। संस्तवः परिचयः। प्रे स्त्रोऽयज्ञे। अयज्ञे इति छेदः। यज्ञे

सि॰कौ॰ कृ॰ कृ॰
२५४

ति प्रकृतत्वात्। प्रस्तारः। अयज्ञे किं। बर्हिषः प्रस्तरः। स्तुति विशेषः। प्रथने वावशब्दे।
विपूर्वात्स्तृणातेर्घञ् अशब्दविषये प्रथने। पटस्य विस्तारः। प्रथने किं। तृणविस्तरः।
अशब्दे किं। ग्रंथविस्तरः। छंदोनाम्नि च। स्तृणातेरित्यनुवर्तते। विष्टारं पंक्ति छंदः। विस्तीर्यंते
अस्मिन्नक्षराणीत्यधिकरणे घञ्। ततः कर्मव्यापारः। छंदोनाम्नि च। विपूर्वात्स्तृणातेर्घञ्
तस्य षत्वं छंदोनाम्नीति षत्वं। उदि ग्रहः। उद्ग्राहः। सम्मिमुष्टौ। मल्लस्य संग्राहः। मु
ष्टौ किं। द्रव्यस्य संग्रहः। परिन्योर्नीणोर्द्यूताभ्रेषयोः। परिपूर्वान्नयतेर्निपूर्वादिणश्च
घञ् स्याद् क्रमेण द्यूतेऽभ्रेषे च विषये। परिणायेन शारान्हंति समंतान्नयनेनेत्यर्थः।

राम
८९

एषोऽत्र न्यायः। उचितमित्यर्थः। धूताभ्रेषयोः किं। परिणयो विवाहः। नयो नाशः। पराव
नुपात्ययइणः। क्रमप्राप्तस्य अनतिपातोऽनुपात्ययः। तत्र पर्यायः। अनुपात्यये किं।
कालस्य पर्ययः। अतिपात इत्यर्थः। व्युपयोः शेतेः पर्याये। तव विशायः। राजोपशायः।
पर्याये किं। विशयः। संशयः। उपशयः समीपशयनं। हस्तादाने चेरस्तेये। हस्तादान इ
त्यनेन प्रत्यासत्तिरादेयस्य लक्ष्यते। पुष्पप्रचायः। हस्तादाने किं। वृक्षाग्रस्थानां फलानां
यष्ट्या प्रचयं करोति। अस्तेये किं। पुष्पप्रचयश्चौर्येण। निवासचितिशरीरोपसमाधा
नेष्वादेश्च कः। एषु चिनोतेर्घञ् आदेश्च ककारः। उपसमाधानं राशीकरणं। तद्व्यात्वर्थः।

अन्ये प्रत्ययार्थस्य कारकस्योपाधिभूताः। निवासे। काशीनिकायः। चितौ। आयौको
मग्निं चिन्वीत। शरीरे। चीयतेऽस्मिन्नस्थ्यादिकमिति कायः। समूहे। गोमयनिकायः। एषु किं।
चयः। चः क इति वक्तव्ये आदेरित्युक्तिः यदुक्तादेरेव यथा स्यादिति। गोमयानां निके
चायः। पुनः पुनराशीकरणमित्यर्थः। संघे चानौत्तराधर्ये। घेर्घञ् आदेशश्च कः। भि
क्षुनिकायः। प्राणिनां समूहः संघः। अनौत्तराधर्ये किं। सूकरनिचयः। संघे किं। ज्ञान
कर्मसमुच्चयः। कर्मव्यतिहारे णच् स्त्रियां। स्त्रीलिंगे भावे णच्। णचः स्त्रियामञ्। न
कर्मव्यतिहारे। अत्र ऐच् न स्यात्। व्यावक्रोशी। व्यावहासी। अभिविधौ भाव इनुण्।

=णिनुणः। आदिवृद्धिः। इनण्यनपत्ये। सांराविणं वर्त्तते। आक्रोशे वन्योर्ग्रहः। अवनि
एतयोर्ग्रहेर्घञ्स्यात् शापे। अवग्राहस्ते भूयात्। अभिभव इत्यर्थः। निग्राहस्ते भूयात्। बा
ध इत्यर्थः। आक्रोशे किं। अवग्रहः पदस्य। निग्रहश्चोरस्य। प्रे लिप्सायां। पात्रप्रग्राहेण च
रति भिक्षुः। परौ यज्ञे। उत्तरः परिग्राहः। स्फ्येन वेदेः स्वीकरणं। नौ वृ धान्ये। वृ इति लुप्तपंचमी
कं। नीवाराः। धान्ये किं। निवरा कन्या। क्तिविषयेपि बाहुलकाद्घञ्। प्रवरा सेतिवत्। उदि
श्रयतियौतिपूद्रुवः। उच्छ्रायः। उद्यावः। उत्पावः। उद्द्रावः। कथं पतनान्ताः समुच्छ्रया इति।
बाहुलकात्। विभाषाङि रुप्लुवोः। आरावः। आरवः। आप्लावः। आप्लवः। अवे ग्रहे वर्षप्र

सि० कौ० उ० कृ०

२६६

तिबंधे। विभाषेति वर्त्तते। अवग्राहः। अवग्रहः। वर्षप्रतिबंधे किं। अवग्रहः पदस्य। प्रे वणि
जां। प्रे ग्रहेर्घञ्वा वणिजां संबंधी चेत्प्रत्ययार्थः। तुलासूत्रमिति यावत्। तुलाप्रग्राहेण च
रति तुलाप्रग्रहेण। रश्मौ च। प्रग्रहः। प्रग्राहः। वृणोतेराच्छादने। विभाषा प्रावृत्य वा प्रावा
रः। प्रवरः। परौ भुवोऽवज्ञाने। परिभावः। परिभवः। अवज्ञाने किं। सर्वतो भवनं परिभवः।
एरच्। चयः। जयः। भयादीनामुपसंख्यानं। नपुंसके क्तादिनिवृत्त्यर्थं। भयं। वर्षं। ऋदो
रप्। करः। गरः। शरः। यवः। लवः। स्तवः। पवः। वृक्षासनयोर्विष्टरः। अनयोर्विपूर्वस्य
स्तृ षत्वं निपात्यते। विष्टरो वृक्ष आसनं च। वृक्षे इति किं। वाक्यस्य विस्तरः। ग्रहवृदृ

राम

६१

निश्चिगमश्च। अप्स्यात्। घञोऽपवादः। ग्रहः। वरः। दरः। निश्चयः। गमः। वशिरण्योरु
पसंख्यानं। वशः। रणः। घञर्थे कविधानं। प्रस्थः। विघ्नः। द्विलप्रकरणे केलृमादीनामिति
वक्तव्यं। चक्रं। चिक्लिदं। चक्नसः। उपसर्गेऽदः। अप्स्यात्। घञपोश्च। अदेर्घस्लृ स्यात् घञि अ
पि च। प्रघसः। विघसः। उपसर्गे किं। घासः। नौ ण वा। नौ उपपदे अदेर्णः स्यादप्। न्यादः।
निघसः। व्यधजपोरनुपसर्गे। अप्स्यात्। व्यधः। जपः। उपसर्गे तु आव्याधः। उपजापः।
स्वनहसोर्वा। अप्। पक्षे घञ्। स्वनः। स्वानः। हसः। हासः। अनुपसर्ग इत्येव। प्रस्वानः।
प्रहासः। यमः समुपनिविषु च। एषु अनुपसर्गे च यमेरप् वा। संयमः। संयामः। उपयमः।

सि॰कौ॰ उ॰ कृ॰
२५४

उपयामः। नियमः। नियामः। वियमः। वियामः। यमः। यामः। नौ गदनदपठस्वनः। अ
ब्वा स्यात्। निगदः। निगादः। निनदः। निनादः। निपठः। निपाठः। निस्वनः। निस्वानः। क्व
णो वीणायां च। नावनुपसर्गे च वीणाविषयाच्चेत् क्वणतेरब्वा स्यात्। वीणाग्रहणं प्राद्य
र्थं। निक्वणः। निक्वाणः। क्वणः। क्वाणः। वीणायां तु प्रक्वाणः। प्रक्वणः। नित्यं पणः परिमा
णे। अप्स्यात्। मूलकपणः। शाकपणः। व्यवहारार्थं मूलकादीनां परिमितो मुष्टि
र्बध्यते सोऽस्य विषयः। परिमाणे किं। पाणः। मदोऽनुपसर्गे। धनमदः। उपसर्गे तु उन्मा
दः। प्रमदसंमदौ हर्षे। हर्षे किं। प्रमादः। समुदोरजः पशुषु। संपूर्वादजेः समुदाये उदस्

राम
९२

र्वश्च प्रेरणे तस्मात्पशुविषयकात् अप् स्यात्। अज अपो रित्युक्ते वी भावो न। समजः पशू
नां संघः। उदजः पशूनां प्रेरणं। पशुषु किं। समाजो ब्राह्मणानां। उदाजः क्षत्रियाणां। अक्षे
षु ग्लहः। अक्ष शब्दे न देवनं लक्ष्यते। तत्र यत्पणरूपेण ग्राह्यं। तत्र ग्लह इति निपात्यते।
अक्षस्य ग्लहः। व्याप्तुक्ता मभिसरणग्लहा मदीव्यन्। अक्षेषु किं। पादस्य ग्रहः। प्रजने स
र्तेः। प्रजनः प्रथमगर्भग्रहणं। गवा मुपसरः। कथमवसरः प्रसर इति। अधिकरणे पुंसि
संज्ञायामिति घः। ह्वः संप्रसारणं च न्यभ्युपविषु। निहवः। अभिहवः। उपहवः। विहवः।
एषु किं। प्रह्वायः। आङि युद्धे। आहूयते स्मिन्नित्याहवः। युद्धे किं। आह्वायः। निपातनमा

क्षि० कौ० उ० कृ०
२६८

हवः। आङ्पूर्वस्य ह्वयतेः संप्रसारणं। अप् वृद्धिश्चोदकाधारस्यैवाख्याः। आहावस्तु नि
पानं स्यादुपकूपजलाशये। भावेनुपसर्गस्य। अनुपसर्गस्य ह्वयतेः संप्रसारणमप्स्या
द्भावे। हवः। हनश्च वधः। अनुपसर्गाद्धंतेर्भावे अप्स्याद्वधादेशश्चांतोदात्तः। वधेन दस्युं।
बाहुघ्नः। आघातः। मूर्तौ घनः। मूर्तिः काठिन्यं तस्मिन्नभिधेये हंतेरप्स्याद्घनश्चादेशः। अभ्र
घनः। कथं सैंधवघनमानयेति। धर्मशब्देन धर्मी लक्ष्यते। अंतर्घनो देशः। वाहीकग्राम
विशेषस्य संज्ञेयं। अंतर्घण इति पाठांतरं। अगारैकदेशे प्रघणः प्रघाणश्च। द्वारदेशे
द्वौ प्रकोष्ठावलिंदौ। आभ्यंतरो बाह्यश्च। तत्र बाह्यप्रकोष्ठे निपातनमिदं। प्रविशद्भिर्जनैः प्र

राम
९३

देः प्रकर्षेण हन्यत इति प्रघासः। कर्मण्यण्। पक्षे वृद्धिः। उद्घनोऽत्याधानं। अत्याधानमु
परिस्थापनं। यस्मिन्काष्ठे अन्यानि काष्ठानि स्थापयित्वा तक्ष्यंते स उद्घनः। अधिकरणे अ
प्। अपघनोऽङ्गं। अङ्गं शरीरावयवः। स चेह न सर्वः किं तु पाणिः पादश्चेत्याहुः। करणे अप्। अ
पघातोऽन्यः। करणेऽयोविद्रुषु। एषु हंतेः करणेऽप्स्यात् घनादेशश्च। अयो हन्यतेऽने
नेत्ययोघनः। विघनः। द्रुघनः। द्रुघण इत्येके। पूर्वपदात्संज्ञायामिति णत्वं। संहैषा कुठार
स्य। द्रुर्वृक्षः। स्तंबे क च। स्तंबेऽपपदे हंतेः करणे कः स्यात् चादप्पक्षे घनादेशश्च। स्तंबघ्नः।
स्तंबघनः। करण इत्येव। स्तंबघातः। परौ घः। परौ हंतेरप्स्यात्करणे घशब्दश्चादेशः। प

रि हन्यतेऽनेनेति परिघः। परेश्च घांकयोः। परेः रेफस्य लो वा स्यात् घशब्दे अंकशब्दे
च। परिघः। पलिघः। पर्य्यंकः। पल्यंकः। इह तरप्तमपौ घ इति कृत्रिमस्य न ग्रहणं व्याख्या
नात्। उपघ्न आश्रये। उपपूर्वाद्धन्तेः स्यात् उपधालोपश्च। आश्रयशब्देन सामीप्यं
लक्ष्यते। पर्वतेनोपहन्यते सामीप्येन गम्यत इति पर्वतोपघ्नः। संघोद्घौ गणप्रशंसयोः। सं
हननं संघः। भावेऽप्। उद्धन्यते उत्कृष्टो ज्ञायते इत्युद्घः। कर्मण्यप्। गत्यर्थानां बुद्ध्यर्थता
इति ज्ञानं। निघो निमितं। समंतान्मितं निमितं। निर्विशेषं हन्यंते ज्ञायंते इति निघा वृ
क्षाः। समारोहपरिणाहा इत्यर्थः। ड्वितः क्त्रिः। अयं भाव एव स्वभावात्। क्त्रेर्मम्नित्यं। नि

राम
९४

त्यय हलन्त्। क्त्रिर्मद्विषयः। अत एव च अयन्तेनन विग्रहः। डुपचष्। पाके न निर्वृत्तं पक्त्रिमं।
डुवप्। उप्त्रिमं। द्वितोऽथुच्। अयमपि स्वभावात् भाव एव। टुवेपृ वेपथुः। श्वयथुः। यजयाच
यतविच्छप्रच्छरक्षो नङ्। यज्ञः। याञ्चा। यत्नः। विश्नः। प्रश्नः। प्रश्ने वासन्नेति लोपकान्ने संप्र
सारणं। उः। त्वं तु विश्न इत्यत्र गुणनिषेधाय। रक्ष्णः। स्वपो नन्। स्वप्नः। उपसर्गे घोः किः। प्र
धिः। अंतर्द्धिः। उपाधीयतेऽनेनेत्युपाधिः। कर्मण्यधिकरणे च। कर्मण्युपपदे घोः किः स्या
दधिकरणेऽर्थे। जलानि धीयंतेऽस्मिन् जलधिः। स्त्रियां क्तिन्। स्त्रीलिंगे भावादौ क्तिन् स्याच्च
सोपवादः। अजपो तु परत्वाद्बाध्यते। कृतिः। चितिः। स्तुतिः। स्फायी। स्फातिः। स्फीतिकामदति

सिं॰ कौ॰ उ॰ कृ॰

२७०

तुग्रामादिकं। कांता। ह्यात्वर्थे क्तिविधानमेवेदिति वा समाधेयं। श्रुयजीषिस्तुभ्यः करणे।
श्रूयतेऽनया श्रुतिः। यजेरिषेश्च इष्टिः। स्तुतिः। ऋल्वादिभ्यः क्तिन्निष्ठावद्वाच्यः। तेन नत्वं।
कीर्णिः। गीर्णिः। लूनिः। धूनिः। पूनिः। ल्वाद इति योगविभागात् क्तिन्निष्ठवत्। प्रह्लत्तिः। तिवा दू
र्त्तिः। फुल्तिः। वायतेः क्तिन्निष्ठावद्भावो वाच्यः। अपचितिः। संपदादिभ्यः क्विप्। संपत्। विपत्। क्ति
न्नपीष्यते। संपत्तिः। विपत्तिः। स्थागापापचो भावे। क्तिन्स्यादङोऽपवादः। प्रस्थितिः। उपस्थितिः।
संगीतिः। संपीतिः। पक्तिः। कथमवस्था संस्थेति। व्यवस्थायामिति ज्ञापकात्। ऊतियूतिजू
तिसातिहेतिकीर्त्तयश्च। अवतेर्ज्वरत्वरेत्यूठ्। ऊतिः। स्वरार्थं वचनं। उदात्त इति हि वर्त्तते। यू

राम

९५

तिः। ऊतिः। जनयोर्दीर्घत्वं च निपात्यते। स्यतेः सातिः। ईत्वाभावो निपात्यते। सनोतेर्वा जनसनखनां सञ्झलोरित्यात्वे कृते स्वरार्थं निपातनं। हन्तेर्हिनोतेर्वा हेतिः। कीर्तिः। व्रजयजोर्भावे क्यप्। व्रज्या। इज्या। संज्ञायां समजनिषदनिपतमनविदषुञ्शीङ्भृञिणः। समजादिभ्यः स्त्रियां भावादौ क्यप् स्यात्। सव्रो दन्तः संज्ञायां। अज्ञेः क्यपि वीभावो नेति वाच्यं। समजन्ति तस्यामिति समज्या सभा। निषीदन्त्यस्यां निषद्या आपणः। निपतन्त्यस्यामिति निपत्या पिच्छिला भूमिः। मन्यतेऽनयेति मन्या। गलपार्श्वसिरा। विदन्ति तया विद्या। सुत्या। अभिषवः। शय्या। भृत्या। ईयतेऽनया इत्या। शिबिका। कृञः श च। कृञ इति योगविभागः। कृञः क्यप् स्यात्। कृत्या। शः। वा। वा। क्रिया। क्रिया। कृतिः। इच्छा।

इषेर्भावे शः यगभावश्च निपात्यते। इच्छा। परिचर्यापरिसर्यामृगयाटाट्यानामुपसंख्या
नं। शे यक् च निपात्यते। परिचर्या पूजा। परिचर्या। परिसरणं मत्रगुल्मे पि। मृग अन्वेषणे चु
रादावदंतः। अतो लोपाभावो पि। शे यकि णिलोपः। मृगया। अटतेः शेयकि द्युप्रद्स्य द्वित्वं
पूर्वभागे यकारनिवृत्तिर्दीर्घः। अटाट्या। जागर्तेरकारो वा। पक्षे शः। जागरा। जागर्या। अ
प्रत्ययात्। प्रत्ययान्तेभ्यो धातुभ्यः स्त्रियामकारप्रत्ययः स्यात्। चिकीर्षा। पुत्रकाम्या। गुरो
श्च हलः। गुरुमतो हलन्तात् स्त्रियामकारः स्यात्। ईहा। ऊहा। गुरोः किं। भक्तिः। हलः किं। नीतिः।
निष्ठायां सेट इति वक्तव्यं। नेह। आप्तिः। ति तु त्रेति नेट्। दीप्तिः। तितुत्रेष्वग्रहादीनामिति वा

ग्यो निग्रहाति ॥ निपठितिः ॥ षिद्भिदादिभ्योऽङ् ॥ षिद्भ्यो भिदादिभ्यश्च स्त्रियामङ् ॥ जॄष् ॥ ज
रा ॥ त्रपूष् ॥ त्रपा ॥ भिदा ॥ विदा करण एवायं ॥ भित्तिरन्या ॥ छिदा ॥ मृजा ॥ कृपेः संप्रसारणं
वा ॥ कृपा ॥ चिंतिपूजिकथिकुंबिचर्चश्च ॥ अङः स्याद्युचोपवादः ॥ चिंता ॥ पूजा ॥ कथा ॥ कुंबा ॥
चर्चा ॥ आतश्चोपसर्गे ॥ अङ् स्यात् ॥ क्तिनोपवादः ॥ प्रदा ॥ उपदा ॥ श्रदंतरोरुपसर्गवद्वृत्तिः ॥
श्रद्धा ॥ अंतर्द्धा ॥ ण्यासश्रंथो युच् ॥ अकारस्यापवादः ॥ कारणा ॥ हारणा ॥ आसना ॥ श्रंथना ॥
घट्टिवंदिविदिभ्यश्चेति वाच्यं ॥ घट्टना ॥ वंदना ॥ वेदना ॥ इषेरनिच्छार्थस्य ॥ अन्वेषणा परेषी ॥
पर्येषणा ॥ परीष्टिः ॥ रोगाख्यायां ण्वुल्बहुलं ॥ प्रच्छर्दिका ॥ प्रवाहिका ॥ विचर्चिका ॥ हृद्विन्ना ॥ शि

सि० कौ० उ० खं०

२१२

रोर्त्तिः। धात्वर्थनिर्देशे ण्वुल् वक्तव्यः। आसिका। शायिका। इक्श्तिपौ धातुनिर्देशे। प
चिः। पचतिः। वर्णात्कारः। निर्देश इत्येव। अकारः। ककारः। रादिफः। रेफः। मत्वर्थाच्छः।
बहुलवचनादकारलोपः। मत्वर्थीयः। इणजादिभ्यः। आजिः। आतिः। इञ्वपादिभ्यः। वा
पिः। वासिः। स्वरे भेदः। इक्कृष्यादिभ्यः। कृषिः। गिरिः। संज्ञायां। अत्र धातोर्ण्वुल्। उद्दा
लकपुष्पभंजिका। विभाषाख्यानपरिप्रश्नयोरिञ्च। परिप्रश्ने आख्याने च गम्ये इञ्
स्याद्वा ण्वुल्च। विभाषोक्तेर्यथाप्राप्तमन्येऽपि। कां त्वं कारिं कारिकां क्रियां कृत्यां कृतिं
वाऽकार्षीः। सर्वां कारिं कारिकां क्रियां कृत्यां कृतिं वाऽकार्षम्। एवं गणिं गणिकां गण

राम

६१

नो। पाविं पाविकां पर्वां पर्त्तिं। पर्य्यायार्हर्णोत्पत्तिषु ण्वुच्। पर्य्यायः परिपाटी क्रमः। अर्ह
णमर्हः योग्यता। पर्य्यायादिषु द्योत्येषु ण्वुच् वा स्यात्। भवत आसिका। शायिका। अग्र
गामिका। भवानिक्षुभक्षिकामर्हति। ऋणे। इक्षुभक्षिकां मधारयसि। उत्पत्तौ। इक्षुभ
क्षिका उदपादि। आक्रोशे नञ्यनिः। विभाषेति निवृत्तं। नञि उपपदे अनिः स्यादाक्रोशे। अ
जीवनिः। ते शठ भूयात्। अप्रयाणिः। नपुंसके भावे क्तः। ल्युट् च। हसितं। हसनं। योगविभा
ग उत्तरार्थः। कर्मणि च येन संस्पर्शात्कर्तुः शरीरसुखं। येन संस्पृश्यमानस्य कर्तुः शरी
रसुखमुत्पद्यते तस्मिन्कर्मण्युपपदे ल्युट् स्यात्। पूर्वेण सिद्धे नित्यसमासार्थं वच

सि॰कौ॰उ॰कृ॰

२७३

नं। पयःपानं सुखं। कर्त्तुरिति किं। गुरोः स्नापनं सुखं। नेह गुरुः कर्त्ता किंतु कर्म। वायौ।
अजेर्वी वा स्यात् यौ। प्रवयणं। प्राजनं। करणाधिकरणयोश्च। ल्युट् स्यात्। इध्मप्र
व्रश्चनः। कुठारः। गोदोहनी स्थाली। खजः प्राक् करणाधिकरणयोरित्यधिकारः। अं
तरदेशे। अंतःशब्दाद्धंतेर्नस्य णः स्यात्। अंतर्हणनं देशे तु अंतर्हननो देशः। अत्पूर्व
स्येत्येव। अंतर्घ्नति। तपरः किं। अंतरघानि। अयनं वा। अयनस्य णोऽन्तःशब्दात्परस्य।
अंतरयणं। अदेश इत्येव। अंतरयनो देशः। पुंसि संज्ञायां घः प्रायेण। छादेर्घेऽद्व्युपसर्ग
स्य। द्विप्रभृत्युपसर्गहीनस्य छादेर्ह्रस्वः स्याद् घे परे। दंताछाद्यंतेऽनेन दंतच्छदः। आकु

राम

९८

र्वंत्यस्मिन्नाकरः। गोचरसंचरवहव्रजव्यजापणनिगमाश्च। घांता निपात्यंते। हल
श्चेति वक्ष्यमाणस्य घञोऽपवादः। गावश्चरंत्यस्मिन्निति गोचरो देशः। संचरंतेऽनेन संच
रो मार्गः। वहंत्यनेन वहः स्कंधः। व्रजः। व्यजः। तालवृंतं। निपातनाद्वीभावो न। आपणः
पण्यस्थानं। निगच्छंत्यनेन निगमश्छंदः। वा कषः। निकषः। अवे तॄस्त्रोर्घञ्। अवतारः
कूपादेः। अवस्तारो जवनिका। हलश्च। हलंताद्घञ् स्यात्। घापवादः। अपमृज्यतेऽनेन व्या
ध्यादिरित्यपामार्गः। विमार्गः समूहनी। अध्यायन्यायोद्यावसंहाराश्च। अधीयतेऽस्मि
न्नध्यायः। नियंति उद्यवंति संहरंति एभिरिति विग्रहः। अवहाराधारावायानामुप

सि॰ कौ॰ उ॰ कृ॰

२१४

संख्याने। उदंकोऽनुदके। उत्पूर्वादंचतेर्घञ्स्यान्नलोदकौ। घृतमुदञ्यतेऽप्रियतेऽस्मिन्नि
ति घृतोदंकः। चर्ममयं भांडं। अनुदके किं। उदकोदंचनः। आनेमानायः। आनीयंतेमत्स्या
दयोऽनेनेत्यानायः। जालमितिकिं। आनयनः। खनो घ च। बाहुल्य। आखनः। आखानः।
चित्करणमन्यतोऽप्ययमिति ज्ञापनार्थं। तेन भगः पदमित्यादि। खनेः डडरइकइकवका
वाच्याः। आखः। आखरः। आखनिकः। आखनिकवकः। एते खनित्रवचनाः। ईषद्दुःसुषु
कृच्छ्राकृच्छ्रार्थेषु खल्। अकरणाधिकरणयोरितिनिवृत्तं। एषु दुःखसुखार्थेषूपपदेषु
खल्स्यात्। तयोरेवेति भवे कर्मणि वा। कृच्छ्रे। दुष्करः करो भवता। अकृच्छ्रे। ईषत्करः। सुक

राम

६६

नसुदुर्भ्यां केवलाभ्यां। उपसर्गांतररहिताभ्यां

रः। निमिमीलियां खलचोरात्वं नेति वाच्यं। ईषन्नियमः। दुःप्रमयः। सुविलयः। नियमः। मयः।
लयः। उपसर्गात्खल्घञोः। उपसर्गादेव लभेर्नुम् स्यात्। ईषत्प्रलंभः। दुःप्रलंभः। सुप्र
लंभः। उपसर्गात्किं। ईषल्लभः। लाभः। सुदुर्भ्यां लभेर्नुम्न स्यात्खल्घञोः परतः। सुलभो।
दुर्लभो। केवलाभ्यां किं। सुप्रलंभः। अतिदुर्लभः। कथं तर्हि-अतिसुलभमतिदुर्लभमिति।
यदा स्वती कर्मप्रवचनीयौ तदा भविष्यति। कर्तृकर्मणोश्च भूकृञोः। कर्तृकर्मणोरीषदादि
षु च उपपदेषु भूकृञोः खल् स्यात्। आयथासंख्यं नेष्यते। कर्तृकर्मणी च धातोरव्यवधानेन
प्रयोज्ये ईषदादयस्तु ततः प्राक्। कर्तृकर्मणोश्च्व्यर्थयोरिति वाच्यं। खित्वान्मुम्। अनाढ्ये

न॰ आढ्येन दुःखेन भूयते दुराढ्यंभवं। ईषदाढ्यंभवं। स्वाढ्यंभवं। दुराढ्यंकरः। स्वाढ्यंकरः।
च्व्यर्थयोः किं। आढ्येन सुभूयते। आतो युच्। खलोऽपवादः। ईषत्पानः सोमो भवता। दुःपानः।
सुपानः। भाषायां शासियुधिदृशिधृषिमृषिभ्यो युज्वाच्यः। दुःशासनः। दुर्योधनः। इत्या
दि। षात्पदांतात्। नस्य णो ना। निष्पानं। सर्पिष्पानं। षात्किं। निर्णयः। पदांतात्किं। पुष्णाति। प
दे अंतः पदांतोयमिति समासे समासोयं तेनेह न सुसर्पिष्केण। आवश्यकाधमर्णयोर्णि
निः। अवश्यंकारी। शतंदायी। कृत्याश्च। आवश्यकाधमर्णयोरित्येव। अवश्यं हरिः से
व्यः। शतंदेयं। क्तिच्क्तौ च संज्ञायां। धातोः क्तिच्क्तश्च स्यादाशिषि संज्ञायां। तितुत्रेति नेट्।

नवतात्। भूतिः। नक्ति विदीर्घश्च। अनिटां वनतितनोत्यादीनां वदीर्घानुनासिकलो
पो नस्तः क्ति वियपरे। यंतिः। रंतिः। वंतिः। तंतिः। सनः क्ति विलोपश्चास्यान्यतरस्यां। सनो
तेः क्ति वि आत्वं वास्याल्लोपश्च वा सनुतात्। साति। संतिः। देवाएनं देयासुः देवदत्तः। अ
लंखल्वोः प्रतिषेध्ययोः प्रा वां क्त्वा। प्रतिषेधार्थयोरलंखल्वो रुपपदयोः क्त्वा स्यात्। प्रा वां
ग्रहणं पूजार्थं। अमी वा व्यये नेति नियमान्नोपपदसमासः। दोदह्योः। अलं दत्वा। पुमा
ख्ता। पीत्वा खलु। अलं खल्वो किं। माकार्षीत्। प्रतिषेध्ययोः किं। अलंकारः। उदीचां माङो
व्यतीहारे। व्यतीहारेऽर्थे माङः क्त्वा स्यादपूर्वकाले। अपमिदं। मयतेरिदन्यतरस्यां। मेङः द

कारे तादेशः स्याद्वाप्यपि। अपमित्य याचते। अपमाय। उदीचां ग्रहणं यथाप्राप्तमि
पि। याचित्वा अपमयते। परावरयोगे च। परेण पूर्वस्यावरेण परस्य योगे गम्यमाने धातोः
क्त्वा स्यात्। अप्राप्य नदीं पर्वतः। परनदीयोगोऽत्र पर्वतस्य। अतिक्रम्य पर्वतं स्थिता न
दी। अवरपर्वतयोगोऽत्र नद्याः। समानकर्तृकयोः पूर्वकाले। समानकर्तृकयोर्धात्वर्थ
योः पूर्वकाले विद्यमानाद्धातोः क्त्वा स्यात्। अव्ययकृतो भावे इति भावे। भुक्त्वा व्रजति।
द्वित्वमतंत्रं। स्नात्वा भुक्त्वा पीत्वा व्रजति। अनुदात्तेत्यनुनासिकलोपे। विस्तुनत्वा स्तोति।
स्वरत्यादेः श्रुकः किति इति नित्यमिडभावः पूर्वविप्रतिषेधेन। स्वृत्वा। सृत्वा। धूत्वा।

ति स्कंदिस्यंदेः। एतयो र्नलोपो न स्यात्क्त्वि परे। स्कंत्वा। ऋदित्वादिड्वा। स्यंत्वा। स्यंदित्वा।
न क्त्वा सेट्। सेट् क्त्वा किन्न स्यात्। शयित्वा। सेट् किं। कृत्वा। मृडमृदगुधकुषक्लिशव
दवसः क्त्वा। एभ्यः सेट् क्त्वा कित् स्यात्। मृडित्वा। क्लिशः क्त्वेति वेट्। क्लिशित्वा। क्लिष्ट्वा। उ
दित्वा। उषित्वा। रुदविदेति कित्वं। रुदित्वा। विदित्वा। मुषित्वा। गृहीत्वा। नोपधात्थफां
ताद्वा। सेट् क्त्वा कित् स्याद्वा। श्रथित्वा। श्रंथित्वा। गुफित्वा। गुंफित्वा। नोपधात् किं। गोफित्वा।
रेफित्वा। वंचिलुंच्यृतश्च। सेट् क्त्वा कित् स्याद्वा। वचित्वा। वंचित्वा। लुचित्वा। लुंचित्वा। ऋतित्वा।
अर्तित्वा। तृषिमृषिकृशेः काश्यपस्य। एभ्यः सेट् क्त्वा कित् स्याद्वा। तृषित्वा। तर्षित्वा। मृषि

त्वा। मर्षित्वा। कृशित्वा। कर्शित्वा। रलो व्युपधादिति वा कित्त्वं। द्युतित्वा। द्योतित्वा। लिखि-
त्वा। लेखित्वा। व्युपधात् किं। वर्तित्वा। रलः किं। सेवित्वा। हलादेः किं। एषित्वा। सेट् किं। भुक्त्वा।
वसतिक्षुधोरिट्। क्षुधित्वा। उषित्वा। अंचेः पूजायामिति नित्यमिट्। अंचित्वा। गतौ
तु अक्त्वेत्यपि। लोभित्वा। लुभित्वा। लुभो विमोहने इतीट्। विमोहने तु। लुब्ध्वा। जृव्रश्च्योः
क्त्वि। आभ्यां परस्य क्त्व इट् स्यात्। जरीत्वा। जरित्वा। व्रश्चित्वा। उदितो वा। उदितः परस्य
क्त्व इड्वा। शमित्वा। अनुनासिकस्य क्वीति दीर्घः। शांत्वा। द्यूत्वा। देवित्वा। क्रमश्च क्त्वि। क-
मन उपधाया वा दीर्घः स्यात् झलादौ क्त्वि परे। क्रांत्वा। क्रंत्वा। झलि किं। क्रमित्वा। पूङश्चेति

वेट्। पवित्वा। पूत्वा। जांतनशांविभाषा। जांतानां नशेश्च न लोपो वास्या परे। नत्का।
मं त्का। रक्त्वी। रं त्का। मस्जिनशोरिति नुम्। तस्यपक्षे लोपः। नष्ट्वा। नंष्ट्वा। रध्यादिभ्यश्चे
ती इट् पक्षे। नशित्वा। ऊर्जादवितिवाच्यं। नेह। -अंजित्वा। ऋदित्वाद्वेट्। पक्षे। -अक्त्वा। -अंक्त्वा। ज
नसनेत्यात्वं। खात्वा। खनित्वा। घतिस्यतीतित्वं। दित्वा। सित्वा। मित्वा। स्थित्वा। दधातेर्हिः। हि
त्वा। जहातेश्च क्त्वि। हित्वा। हाङः स्तु। हात्वा। -अदो जग्धिः। जग्ध्वा। समासेऽनञ्पूर्वे क्त्वो ल्य
प्। -अव्ययपूर्वपदे -अनञ्समासे क्त्वो ल्यबादेशः स्यात्। तुक्। प्रकृत्य। -अनञ् किं। -अकृ
त्वा। पर्युदासाश्रयणान्नेह। परमकृत्वा। पत्वं तु कोरसिद्धः। पत्वे तु किं वकर्तव्ये एकादेश

शास्त्वमसिद्धं स्यात्। कोऽसिवत्। ढ्हषत्वं न। ऽम्भ्यो त्या। प्रेत्य। ह्रस्वस्येति तुक्। वा ल्यपि।
अनुदात्तोपदेशवनतितनोत्यादीनामनुनासिकलोपो वा स्यात् ल्यपि। व्यवस्थितविभाषे
यं। तेन मांतानिटां वा। नांतानिटां वनादीनां च नित्यं। आगत्य। आगम्य। प्रणत्य। प्रणम्य। प्र
मत्य। प्रवत्य। वितत्य। अदो जग्धिः। अंतरंगानपि विधीन्वहिरंगो ल्यब्बाधते। जग्धि
विधौ ल्यब्ग्रहणात्। तेन हि त्वदत्व आत्वेत्वदीर्घत्व इत्त्वादौ ल्यपि न। विधाय। प्रदाय। प्र
स्वन्य। प्रस्थाय। प्रक्रम्य। आपृच्छ्य। प्रदीव्य। न ल्यपि। ल्यपि परे घुमास्थादेरीत्वं न। ध्येट्। प्र
धाय। प्रमाय। प्रगाय। प्रपाय। प्रहाय। प्रसाय। मीनातिमिनोतीत्यात्वं। प्रमाय। निमाय। उ

प्रणय्य। विभाषा लीयतेः। विलाय। विलीय। णिलोपः। उत्तार्य। विचार्य। ल्यपि लघुपूर्वा
त्। लघुपूर्वात्परस्य णेरयादेशः स्यात् ल्यपि। विगणय्य। प्रणमय्य। प्रबेभिदय्य। लघु
पूर्वात्किं। संप्रधार्य। विभाषापः। आप्नोतेर्णेरयादेशो वा स्यात् ल्यपि। प्रापय्य। प्राप्य। क्षि
यः। क्षियो ल्यपि दीर्घः स्यात्। प्रक्षीय। ल्यपि च। वेञो ल्यपि संप्रसारणं न स्यात्। प्रवाय।
ज्यश्च। प्रज्याय। व्यश्च। उपव्याय। विभाषा परेः। परेर्व्यो वा संप्रसारणं स्यात् ल्यपि। तु
कं बाधित्वा परत्वाद्धल इति दीर्घः। परिवीय। परिव्याय। कथं मुखं व्यादाय स्वपिति। नेत्रे
निमील्य हसतीति। व्यादानसंमीलनेनोत्तरकालेपि स्वापहासयोरनुवृत्तेः तदंशविवक्ष

सि॰कौ॰उ॰कृ॰

२७९

यानविष्यति।-आभीक्ष्ण्ये णमुल्च। पौनःपुन्ये द्योत्ये पूर्वविषये णमुल्स्यात् क्त्वाच।
द्वित्वं स्मारं स्मारं नमति शिवं। स्मृत्वा स्मृत्वा। पायं पायं। भोजं भोजं। श्रावं श्रावं। विस्मृणो
रिति णमुल्परे ऐौ वा दीर्घः। गामं गामं। विभाषा विस्मृणोरिति नुम्वा। लंभं लंभं। लाभं
लाभं। व्यवस्थितविभाषया उपसृष्टस्य नित्यं नुम्। प्रलंभं प्रलंभं। जाग्रोविचिण्णल्ङित्सु
गुणः। जागरं जागरं। एवं तस्याप्येवं। नयद्यनाकांक्षे। यच्छब्दे उपपदे पूर्वकालेयथाप्राप्तंतुन्न।
यत्रपूर्वोत्तरे क्रिये तद्वाक्यं अपरं नाकांक्षते चेत्। यदयं भुंक्ते ततः पठति। इह क्त्वाणमु
लौना। अनाकांक्षे किं। यदयं भुक्त्वा व्रजति ततोधीते। विभाषाग्रेप्रथमपूर्वेषु। आभी

राम

१०४

क्ष्ण्ये इति नानुवर्त्तते। एषूपपदेषु समानकर्तृकयोः पूर्वकाले क्त्वा णमुलौ वा स्तः। अ
ग्रे भोजं व्रजति। अग्रे भुक्त्वा। प्रथमं भोजं प्रथमं भुक्त्वा। पूर्वं भोजं पूर्वं भुक्त्वा। पक्षे ल
ङादयः। अग्रे भुङ्क्ते ततो व्रजति। आभीक्ष्ण्ये तु पूर्वविप्रतिषेधेन नित्यमेव विधिः। अग्रे भोजं
भोजं व्रजति भुक्त्वा भुक्त्वा। कर्मण्याक्रोशे कृञः खमुञ्। कर्मण्युपपदे आक्रोशे गम्यमाने।
चौरंकारमाक्रोशति। करोतिरुच्चारणे। चौरशब्दमुच्चार्येत्यर्थः। स्वादुमि णमुल्। स्वाद्वर्थे
षु कृञो णमुल् स्यात् एककर्तृकयोः पूर्वकाले। पूर्वपदस्य मान्तत्वं निपात्यते। अस्वाद्वीं
स्वाद्वीं कृत्वा भुङ्क्ते। स्वादुंकारं भुंक्ते। संपन्नंकारं लवणंकारं। संपन्नलवणशब्दौ स्वादुपर्या

यो। वा सरूपेण क्त्वापि। स्वादुं कृत्वा भुंक्ते। अन्यथैवंकथमित्थंसु सिद्धाप्रयोगश्चेत्।
एषु कृञो णमुल् स्यात्। सिद्धः अप्रयोगोऽस्य एवं भूतश्चेत् कृञ् व्यर्थत्वात्। प्रयोगान
र्ह इत्यर्थः। अन्यथाकारं। एवंकारं कथंकारं इत्थंकारं भुंक्ते। इत्थं भुंक्त इत्यर्थः। सिद्धेति किं।
शिरोऽन्यथा कृत्वा भुंक्ते। यथातथयोरसूयाप्रतिवचने। कृञः सिद्धाप्रयोग इत्येव। असू
याप्रतिवचने। यथाकारमहं भोक्ष्ये तथाकारं भोक्ष्ये किं तवानेन। कर्मणि दृशिविदोः सा
कल्ये। कर्मण्युपपदे णमुल् स्यात्। कन्यादर्शं वरयति। सर्वाः कन्या इत्यर्थः। ब्राह्मणवेदं
भोजयति। यं यं ब्राह्मणं जानाति लभते विचारयति वा तं सर्वं भोजयतीत्यर्थः। यावति विं

विंदजीवोः। यावद्वेदं भुङ्क्ते। यावज्जीवते तावदित्यर्थः। यावज्जीवमधीते। चर्मोदरयोः पू
रेः। कर्मणीत्येव। चर्मपूरं स्तृणाति। उदरपूरं भुंक्ते। वर्षप्रमाण ऊलोपश्चास्यान्यत
रस्यां। कर्मण्युपपदे पूरेर्णमुल्स्यात् ऊकारलोपश्च वा समुदायेन वर्षप्रमाणे गम्ये। गो
ष्पदप्रं वृष्टो देवः। गोष्पदपूरं। अस्येति किं। उपपदस्य मा भूत्। मूषिकाबिलप्रं। चेले क्नो
पेः। चेलार्थेषु कर्मसूपपदेषु क्नोपेर्णमुल्स्यात्। वर्षप्रमाणे। चेलक्नोपं वृष्टो देवः। वस्त्र
क्नोपं। वसनक्नोपं। निमूलसमूलयोः कषः। कर्मणीत्येव। कषादिष्वनुप्रयोगं वक्ष्यते।
अत्र प्रकरणे पूर्वकालवृत्तिर्न संबध्यते। निमूलकाषं कषति। समूलकाषं कषति। नि

मूलं समूलंकषती त्यर्थः। एकस्यापि धात्वर्थस्य निमूलादिविशेषणसंबंधाद्भेदः।
तेन सामान्यविशेषभावेन विशेषणविशेष्यभावः। शुष्कचूर्णरूक्षेषु पिषः। एषु क
र्मसु पिषेर्णमुल्। शुष्कपेषं पिनष्टि। शुष्कं पिनष्टीत्यर्थः। चूर्णपेषं। रूक्षपेषं। समूल
लाकृतजीवेषु हन्कृञ्ग्रहः। कर्मणीत्येव। समूलघातं हन्ति। अकृतकारं करोति। जी
वग्राहं गृह्णाति। जीवतीति जीवः। इगुपधलक्षणः कः। जीवं तं गृह्णातीत्यर्थः। करणे हनः।
पादघातं हन्ति। पादेन हन्तीत्यर्थः। यथाविध्यनुप्रयोगार्थः सन् नित्यसमासार्थो
ऽयं योगः। भिन्नत्वात्तु संबंधे तु हिंसार्थानां चेति वक्ष्यते। स्नेहने पिषः। स्निह्यते येन तत्

स्मिन्करणेपिषेर्णमुल् । उदपेषंपिनष्टि । उदकेनपिनष्टीत्यर्थः । हस्तेवर्त्तिग्र

होः । हस्तार्थेकरणे । हस्तवर्त्तंवर्त्तयति । करवर्त्तं । हस्तेनगुलिकांकरोतीत्यर्थः । हस्त

ग्राहंगृह्णाति । करग्राहं । पाणिग्राहं । स्वेपुषः । करणइत्येव । स्वशब्दस्यार्थग्रहणंतेनस्व

रूपेपर्यायेविशेषेषुणमुल् । स्वपोषंपुष्णाति । धनपोषं । गोपोषं । अधिकरणेबंधः ।

चक्रबंधंबध्नाति । चक्रेबध्नातीत्यर्थः । संज्ञायां । बध्नातेर्णमुल्संज्ञायां । क्रौंचबंधंबद्धः ।

मयूरिकाबंधं । अट्टालिकाबंधं । बंधविशेषाणांसंज्ञाएताः । कर्त्रोर्जीवपुरुषयोर्नशि

वहोः । जीवनाशंनश्यति । जीवोनश्यतीत्यर्थः । पुरुषवाहंवहति । पुरुषोवहतीत्यर्थः । ऊ

र्ध्वे शुषिपूरोः। ऊर्ध्वे कर्त्तरि। ऊर्ध्वशोषं शुष्यति। वृक्षादिरूर्ध्व एव तिष्ठन् शुष्यतीत्यर्थः। ऊर्ध्वपू
रं पूर्यते। ऊर्ध्वमुख एव घटादिः वर्षोदकादिना पूर्णो भवतीत्यर्थः। अजकनाशं नष्टः। अज
क इव नष्टः इत्यर्थः। कषादिषु यथाविध्यनुप्रयोगः। यस्मात्स णमुलुक्तः स एवानुप्रयोक्तव्य
इत्यर्थः। तथैवोदाहृतं। उपदंशस्तृतीयायां। इतः प्रभृति पूर्वकालइति संबध्यते। तृ
तीयाप्रभृतीन्यन्यतरस्यामिति वा समासः। मूलकोपदंशं भुङ्क्ते। मूलकेनोपदंशं द
श्यमानस्य मूलकस्य भुजिं प्रति करणत्वात्तृतीया। यद्यपि। उपदंशिना सह न शाब्दः
संबन्धः तथापि उपदंशेः कर्मत्वात्। एतावतैव सामर्थ्येन प्रत्ययः समास

स्यात्तृतीयायामितिवचनसामर्थ्यात्। हिंसार्थानां च समानकर्मकाणां। तृतीयांते
उपपदेऽनुप्रयोगधातुना समानकर्मकाद्धिंसार्थाण्णमुल् स्यात्। दण्डोपघातं गाः
कालयति। दण्डेनोपघातं। दण्डताडं। समानकर्मकाणां किं। दण्डेन चोरस्याहत्य गाः काल
यति। सप्तम्यां चोपपीडरुधकर्षः। उपपूर्वेभ्यः पीडादिभ्यः सप्तम्यंते तृतीयांते चोपपदे
णमुल् स्यात्। पार्श्वोपपीडं शेते। पार्श्वयोरुपपीडं। पार्श्वाभ्यामुपपीडं। व्रजे।परोधं
गाः स्थापयति। व्रजेनउपरोधं वा। पाण्युपकर्षं धानाः संगृह्णाति। पाणावुपकर्षं। पा
णिनोपकर्षं। समासत्तौ। तृतीयासप्तम्योर्धातोर्णमुल् स्यात् संनिकर्षे गम्यमाने। के

सि॰ कौ॰ उ॰ कृ॰

२८३

शग्राहं युध्यंते। केशेषु गृहीत्वा। हस्तग्राहं। हस्तेन गृहीत्वा। प्रमाणे। तृतीयासप्तम्यो
रित्येव। द्व्यंगुलोत्कर्षं खंडिकां छिनत्ति। द्व्यंगुलेन द्व्यंगुले वोत्कर्षं। अपादाने परीप्सायां।
परीप्सा त्वरा। शय्योत्थायं धावति। शय्यायाःउत्थायम्। द्वितीयायां च। परीप्सायामित्ये
व। यष्टिग्राहं युध्यंते। लोष्टग्राहं। अपगुरो णमुलि। गुरी उद्यमने। ऽस्यैचो वा ऽऽत्स्या
स्णमुलि। अस्यपगोरं युध्यंते। अस्यपगारं। स्वांगेऽध्रुवे। द्वितीयायामित्येव। अध्रुवे स्वांगे
द्वितीयांते धातोर्णमुल्। भ्रूविक्षेपं कथयति भ्रुवं विक्षेपं। अध्रुवे किं। शिर उत्क्षिप्य।
येन विना नजीवनं तद्ध्रुवं। परिक्लिश्यमाने च। सर्वतो विबाध्यमाने स्वांगे द्वितीयांते

राम

१०८

णमुल्स्यात् । उरः प्रतिपेषं युध्यंते । कृत्स्नमुरः पीडयंत इत्यर्थः । उदरे विदारं प्रति
वस्कंदेन देवैः । ध्रुवार्थमिदं । विशिपतिपदिस्कंदां व्याप्यमानासेव्यमानयोः । द्वितीय
याम् इत्येव । द्वितीयांतउपपदे विश्यादिभ्यो णमुल् स्यात् व्याप्यमाने ऽऽसेव्यमा
ने वार्थे गम्ये । गेहादि व्याप्यं विश्यादिक्रियाभिः साकल्येन संबंधो व्याप्तिः । क्रिया
याः पौनःपुन्यमासेवा । नित्यवीप्सयोरिति द्वित्वं तु न भवति समासेनैव स्वभावतः
तयोरुक्तत्वात् । यद्यप्याभीक्ष्ण्ये णमुल् तु क्त एव तथापि उपपदसंज्ञार्थं समासे
वार्थमिति पुनर्विधिः । गेहानुप्रवेशमास्ते । गेहं गेहमनुप्रवेशमनुप्रवेशं । एवं । गे

सि॰को॰उ॰ह॰
२८४

हानुप्रपातं। गेहानुप्रपादं। गेहानुस्कंदं। असमासे तु गेहस्य णमुलं तस्य
वपर्यायेण द्वित्वं। अस्यति तृषोः क्रियांतरे कालेषु। क्रियामंतरं पति व्यवध
त्त इति क्रियांतरः तस्मिन्न्यास्वपि वर्त्तमानादस्यतेस्तृष्यतेश्च कालवाचिषु
द्वितीयांतेषु उपपदेषु णमुल्स्यात्। द्व्यहात्यासं गाः पाययति द्व्यहमत्यासं
द्व्यहतर्षं। अत्यसनेन तर्षणेन वा गवां पानक्रिया व्यवधीयते। अद्य पाय
यित्वा द्व्यहमतिक्रम्य पुनः पाययतीत्यर्थः। नाम्न्यादिशिग्रहोः। द्वितीयायामि
त्येव। नामादेशमाचष्टे नामग्राहमाह्वयाति। अव्ययेयथाभिप्रेताख्या

राम
१०९

ने कृञः क्त्वाणमुलौ। यथासिद्धेताख्यानं नाम। अप्रियस्योच्चैः प्रियस्य नीचैः कथनं। उच्चैः कृत्य। उच्चैः कृत्वा। उच्चैःकारं। अप्रियमाचष्टे। नीचैः कृत्य। नीचैः कृत्वा। नीचैःकारं प्रियं ब्रूते। तिर्यच्यपवर्गे। तिर्यक्शब्दे उपपदे कृञः क्त्वाणमुलौ स्तः। समाप्तौ गम्यमानायां। तिर्यक् कृत्य गतः तिर्यक्कारं। समाप्य गत इत्यर्थः। अपवर्गे किं। तिर्यक् कृत्वा काष्ठं गतः। स्वाङ्गे तस्प्रत्यये कृभ्वोः। मुखतः कृत्वा। मुखतःकारं मुखतोभूय। मुखतोभूत्वा मुखतोभावं। नाधार्थप्रत्यये च्व्यर्थे। नाधार्थप्रत्ययान्ते च्व्यर्थविषये उपपदे कृभुवोः क्त्वाणमुलौ

सि॰ कौ॰ उ॰ कृ॰

२८५

स्तः। ञ नाना नानाकृत्वा नानाकृत्य नानाकारं। विनाकृत्य विनाकृत्वा
विनाकारं। नानाभूय नानाभूत्वा। नानाभावं। ञ अनेकं द्रव्यमेकं भूत्वा एक
धाभूय। एकधाभूत्वा। एकधाभावं। एकधाकृत्य। एकधाकृत्वा। एकधाका
रं। प्रत्ययग्रहणं किं। हिरुक् कृत्वा। पृथग्भूत्वा। तूष्णीमि भुवः। तूष्णींशब्दे भुवः
क्त्वाणमुलौ स्तः। तूष्णींभूय। तूष्णींभूत्वा। तूष्णींभावं। ञ अन्वच्यानुलोम्ये।
अन्वक्शब्दे उपपदे भुवः क्त्वाणमुलौ स्त ञ आनुकूल्ये गम्यमाने। अन्वग्
भूयास्ते। अन्वग्भूत्वा। अन्वग्भावं। अग्रतः पार्श्वतः पृष्ठतो वानुकूल्यो भू

राम

११०

सि० कौ०
सि० कौ० उ० कृ०
२८६

त्वा आस्त इत्यर्थः। अनुजो मयेकि। अन्वगभूत्वा तिष्ठति। पृष्ठतो भूत्वेत्यर्थः। इ
त्थं लौकिकशब्दानां दिङ्मात्रमिह दर्शितं। विस्तरस्तु यथाशास्त्रं दर्शितः शब्द
कौस्तुभे। भट्टोजिदीक्षितकृतिः सैषा सिद्धांतकौमुदी। प्रीत्यै भूयाद्भगवतोर्भवानी
विश्वनाथयोः। इति श्रीभट्टोजिदीक्षितविरचितायां सिद्धांतकौमुद्यामुत्तरार्द्धं कृद
न्तं समाप्तं।। ।।संवत् १७९८ आश्विनासिताष्टम्यां चंद्रे लिखितमिदं दीक्षितपर
मानंदस्तनुनाबालकृष्णेन काश्यां।। ।।श्रीसिद्धेश्वर्यै नमः।। ।।ॐ नमः शिवाय।।

राम
१११

व्याकरणे कौमुदी
१२००

कृदंतसमाप्तिः

पत्र १११॥

अदः पुस्तकं रामचन्द्र पाठकीयम्